॥ ॥ न्यायकुसुमांजलेः प्रारंभः ॥ ॥

[redacted] ॥ ०१ ॥

१

श्रीगणेशायनमः॥श्रीगुरुभ्योनमः॥ नारायणीनयत्तिना कुसुमांजलिकारिकाः॥ व्याख्या॰ यते सत्तांप्रीत्यैगुरुभक्तिप्रसादतः॥ प्रारिप्सितग्रंथस्यनिर्विघ्नपरिसमाप्तयेकृतेमंगलंशिष्यशिक्षा यैग्रंथादौनिबध्नन्प्रेक्षावत्प्रवृत्तयेप्रयोजनाभिधेयसंबंधग्रंथनामान्याहसत्यक्षप्रसर इति॰ ऋषीनघन्याघप्रसूनांजलिरविघ्नंयथास्यात्तथामेचेत्तोरमयत्वित्यन्वयः अत्रानघन्याघप्रसूनांजलिरित्यस्यानघःशठदोषशून्यःनीयतेप्राप्यतेविवक्षार्थसिद्धिर्नेनेतिन्यायःसमस्तगुरुपोपेतलिंगबोधकवाक्यजातंतत्तदेववांत रवाक्यैरा ह्लादकतयाप्रसूनतुल्यैर्घटितत्वेनांजलिरित्यर्थः किंभूतःईशस्य सत्यक्षप्रसरःसत्तांपरिमलप्रोद्बोधबद्धोत्सवोविघ्नानोनविभर्देनेभक्तरसप्रस्यंदमाध्वीकभूः॥ईशस्येषनिवेशितःपदयुगेभंगायमानंभ्रमच्चेत्तोमेरमयत्य

१

विघ्नघन्यायप्रसूनांजलिः ॥१॥ पदयुगेनिवेशितः अत्रपद्यतेसाध्यतेअनेनेति व्युत्पत्त्या
पदंप्रमाणतर्कोभयं तथाचेश्वरस्यव्यवस्थापकंश्रुत्यनुमानोभयं ▬ तत्रनिविशितः तत्स
हकारितयोपपादितः ईश्वरसाधकानुमानस्यैवतादृशश्रुतिप्रमाणस्याप्यत्रदर्शनात् नच
श्रवणानंतरंमननविधानात्तेनशब्दबोधस्यातीतत्वप्राप्तेस्तत्रनसहकारितेतिवाच्यं यथा
श्रुतस्यान्यपरत्वशंकयाविश्वासनिरासकत्वेनानुमानस्यतदुपयुक्तन्यायस्याप्युपयोगा
दितिस्यष्टं कुसुमांजलिपक्षेअनघत्वंकुसुमविशेषणं तच्चन्यायोपात्तत्वंअपर्युषितत्वं
तथाचन्यायवत्तादृशकुसुमांजलिः ईश्वरस्यप्रस्थदयुगंचरणद्वयंतत्रनिवेशितः सन्नपि
तदित्यर्थः ईशस्येत्यादिमांगलंसूचितं अभिधेयतत्संबंधावपिप्रदर्शितौ चेतः किभूतंभं
गाप्रमानंभंगवदिष्टलुप्तं पुनःकिंभूतंभक्तकुसुमेषुअलिवदनुसरत् इष्टोपायमित्यर्थात्

२ अनघेत्यनेनग्रंथेदोषाभावमुत्कार्षदोषाभावमाह सत्यक्षेत्यादि कुसुमांजलिः किंभूतः सत्यक्षप्रस
रः अत्रग्रंथपक्षेसत्यक्षेपक्षत्वावच्छेदकावच्छिन्ने प्रसरः साध्यहेतोर्ज्ञानंयस्मात्तादृशइत्यर्थः
कुसुमांजलिपक्षेसत्समीचीनः पक्षप्रसरोदलविकाशोयस्यत्तादृशइत्यर्थः पुनःकिंभूतःस
त्तांपरिमलप्रोद्बोधबद्धोत्सवः ग्रंथपक्षेसत्तामीश्वरमननार्थिनांपरिसर्वनःमलः संवेधोव्या
प्तिस्वरूपःतस्यप्रोद्बोधेननिश्चयेनबद्धःकृतःउत्सवःसाध्यसिद्धिरूपानंदोयेनतादृशइ
त्यर्थः कुसुमांजलिपक्षेसत्तोसुरभिनांपरिमलस्यसौरभविशेषस्यप्रोद्बोधेनप्रकृष्टज्ञानेनब
द्धउत्सवोयेनसतथा पुनःकिंभूतःविभ्रान्तोनविमर्द्दनेइतिविमर्द्दनेप्रति हेतुपरामर्शेसति
नविभ्रान्तःकार्य्याकारीनेत्यर्थः कुसुमांजलिपक्षेविमर्द्दनेकरपुटसंसर्गे नविभ्रान्तः नान्यथा
भूतरूपः अर्पदोषाभावमुत्कार्षंपस्यप्रयोजनमाह अमृतरसप्रस्यंदमाध्वीकभूरिति ॥ २

ग्रंथपक्षे अमृतं मोक्षो रस इच्छास्वाद्यमानममृतमिति यावत् तदेव प्रस्यंदः फलं यस्य तत् अमृत
स्वाद्यमानमिति यावत् तदेव माध्वीकं तस्य भूः उत्पत्तिस्थानम् अनेनज्ञानहु एकैकस्यास्य प्र
योजनं प्राप्तं कुसुमांजलिपक्षे अमृतरसः अमृतरूपो रसः अमृतैरूपं यत् प्रस्यंदः माध्वी रस
कं तस्य भूः उत्पत्तिस्थानमित्यर्थः १ मूलं स्वर्गापवर्गयोर्मार्गमामनंति मनीषिणः ॥ यदुपा
स्तिमसावत्र परमात्मा निरूप्यते २ टीका नन्वात्मनस्तु कामाय सर्वं प्रियं भवतीत्युपक्रम्या
त्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्या भोगप्रीतिसंसूचितजीवात्म
साक्षात्कारस्यैव मोक्षसाधनत्वप्रतिपादनात् विरोधिविषयत्वेनाविद्योच्छेदनक्षमत्वाच्च तत्रै
न वमुक्तं तत्ज्ञानमेव मोक्षप्रयोजनकं न त्वीश्वरमननं तथा चेश्वरमननार्थग्रंथस्य तत्रानुपयो
गइति एतद्ग्रंथकरणं निरर्थकमेवेत्यत आह स्वर्गापवर्गयोरिति उपास्तिमिति ईक्षितेर्मशा

दृष्टिरितिवद्भूयस्त्वनिर्देशेनत्रियःप्रयोगःअस्योपासनेमननापरपर्यायस्यस्वर्गापवर्गयोर्हेत्वासंभेत्र
वेनस्वर्गतुल्ययोरपवर्गयोर्जीविन्मुक्तिपरमुक्त्योर्धर्मोर्थस्यात्मसाक्षात्कारप्रतिबंधकपापनाश
द्वारावस्तुतईश्वरंप्रकाश्यनत्वमस्मिंश्चेतनेतरो इतिजीवेश्वरभेदप्रतिपादनाज्जीवात्मनीश्वरभे
दज्ञानस्यापिस्वमतेऽपाहार्यस्यपरमतेप्रमाणांतरइवाबाधितविषयत्वस्यवक्तव्यशब्देनापेक्ष
णात्लक्षणयावाश्रुतिर्बलंलभ्यानाहार्यज्ञानस्यकैवल्यहेतुत्वात् वस्तुतस्तद्ज्ञानादे
वतद्भजनाज्ज्ञानकोपेनस्वाज्ञानधारणेविविधबंधदर्शनात्तद्दोषप्रकाशनमेवस्वाज्ञानहा
रासर्वानर्थहेतुनिवृत्तिस्तद्ज्ञानापनयनेनस्वाज्ञानोक्तदोषमत्वाच्चेश्वरात्मसाक्षात्कारद्वारप्रयो
जकमाहुर्मनीषिणःपंडिताः असौपरमात्माईश्वरस्वरूपःसर्वज्ञत्वादीसर्वानुग्राहकोस
त्रास्मिन्ग्रंथेनिरूप्यतेप्रमाणानर्कांभ्यांव्यवस्थाप्यतेइत्यर्थः नचाचेश्वरमननस्यापिपाप ३

नाशनादिद्वारामोक्षप्रयोजकत्वात्तदर्थकग्रंथस्यापिमोक्षप्रयोजकत्वेननिरर्थकत्वमिति
भावः २ मूलं न्यायचर्चैयमीश्वरस्यमननव्यपदेशभाक् ॥उपासनैवक्रियतेश्रवणानंत
रागत्ता ३ टीका ननुसंदिग्धस्यैवमननीयत्वात्परमेश्वरस्यचसर्ववादिसंमतत्वेननिः
संदिग्धत्वात्संदेहरूपपक्षतायास्तस्मिन्नसंभवेनानुमित्यात्मकतन्मननस्याशक्यत्वा
प्रकृतग्रंथस्यतदर्थकत्वोक्तिरसंगतैवेत्यतआह न्यायचर्चेति मननव्यपदेशभाक् मन
नव्यपदेशवाच्या इमंईश्वरानुमितिर्यर्किंयतेसिसाधयिषयासंपाद्यतेसाप्युपासनैव
मुक्तिप्रयोजकविद्यारूपैवयतःश्रवणानंतरागत्ता श्रोतव्योमंतव्योनिदिध्यासितव्य इ
तिश्रुत्याश्रवणानंतरकर्तव्यत्वेनोक्ताद्यावश्यकीतिभावः तथाचेश्वरनिर्णयसद्भावेपिसि
साधयिषयेश्वरमननंभवतिसिसाधयिषाविरहविशिष्टसिध्यभावरूपपक्षतासत्त्वात् संशय

पक्षत्वात्स्यन्निरस्तत्वात् तथाचनोक्तानुपपत्तिरितिभावः यद्यपिश्रोतव्योमंतव्यइतिश्रुतेरादौश्रव
णमेवोचितं तथापिश्रुतिपुराणेष्वस्तुतोभगवान्मननमेवसभावितोभवति दृश्यत्रमननमेवादृत
मितिमंतव्यं अतएवमननस्यमुख्योपायत्वंचमिश्रैस्तत्कारिकाः ३ मूलं सापेक्षत्वादनादि
त्वादैचित्र्याच्चहेत्वनुमानं ४ टीका अत्रादृष्टाधि
ष्ठातृत्वेनेश्वरंसाधयित्वा नदृष्टंसाधयति सापेक्षत्वादित्यादि अत्रपरलोकेइतिशेषः तथा
चपरलोकेहेत्वनुमानं सापेक्षत्वात्तुच्छादित्यनुमानंतत्रमाननिमित्तभावः सापेक्षत्वंकिंचित्का
लवृत्तित्वेसतिप्रत्यक्षेनसप्रमाणभावेव्यभिचारइतिस्वयंबोध्यं ननुपरलोकहेतोरनादित्वे
परलोकस्याप्यनादित्वापत्त्यातस्यकादाचित्कमवश्यंवाच्यं एवंनहेतोरीश्वरस्यवस्थेस्यन
आहचनादित्वादिति अनादावनवस्थेयंनदोषायप्रामाणिकत्वादितिभावः ननुतथापि
नविचित्रहेतुकत्वसिद्धिः कालादिरूपसाधारणहेतुकत्वमादायार्थांतरसंभवादित्यतआ ४

ह वैचित्र्यादिति स्वर्गनरकादिरूपकार्याणांपरस्परं वैलक्षण्यादित्यर्थः तथाचस्वर्गरूपप
रलोकः विचित्रहेतुकः नरकविलक्षणकार्यत्वात् संमतवदित्यनुमानात्स्वर्गनरकादिरूपपर
लोके विचित्रहेतुकत्वंसिध्यति कारणवैचित्र्यंविनाकार्यैतदसंभवादितिभावः ननुचैवमपिनादृष्ट
सिध्यति यागदानादिरूपदृष्टविचित्रहेतुकत्वमादायार्थांतरसंभवादित्यतआह विध्यश्चवृत्तिश्चवृत्ति·
विध्येषांपरलोकार्थिनांवृत्तिनः यागादौप्रवृत्तिनइत्यर्थः कुतःसंभवः यागादौप्रवृत्तिः स्वर्गादिरूप
परलोकजनकैस्तत्साध्यैस्तवश्यंवाच्यैस्तादृशपरलोकजनकत्वेतुतादृशपरलोकजनकव्यापा
रजनकत्वेचिरविनष्टस्यव्यापारंविनाकालांतरभाविफलंप्रतिजनकत्वासंभवात् तथाचतादृशप्र
वृत्तिश्चेनयागादिप्रवृत्तौपरलोकजनकव्यापारजनकतत्तत्साध्यत्वसिद्धौनदृष्टकव्यापारविध
यादृष्टसिद्धिः व्यापारंतरस्यनदृष्टकत्वासंभवेनार्थांतरासंभवादिति ईश्वरप्रीतेर्व्यापारश्चेत्तु

तरामीश्वरसिद्धिरितिस्वयंबोध्यं नच्चानेनानुमानेनसिध्यत्वदृष्टंनस्यभोक्तृनिष्ठहेतुमानाभाव
इत्यतएवाह प्रत्यात्मनियमादुक्तेरिति तददृष्टंनभोग्यनिष्ठंनवाभोक्तृसाधारणं प्रतिनियत
भोगानुपपत्तिरितिस्वसाधारणंफलसमानाधिकरणमेवकल्पनीयमितिभावः ५ मूलं
हेतुभूतिनिषेधोनस्यानुपाख्यविधिर्नवा॥स्वभावधर्मानैवमवधेर्नियमात्तत्तः ५ टीका
ननुकार्यकारणभावसिद्धेस्याददृष्टसिद्धिःसएवतुनास्तीत्यतआह हेतुभूतीति कार्यहेतु
र्नास्तीतिहेतुर्निषिध्यते भूतिर्वास्वस्मादेवकार्यंसंभवन्तिइतिस्वविधिर्वाक्रियते अनुपा
ख्यादलीकाच्छशशृंगादेवभवन्तीत्यनुपाख्यविधिर्वाक्रियते यथानिर्हेतुकस्याप्यात्मादेर्नि
यतदेशत्वंतथाभूतस्यापिघटादेर्नियतकालीनत्वलक्षणंकादाचित्कमितियास्वभावधर्मणा
एवंकार्यकारणनिषेधेनक्रियतेएतेष्वप्येकमपिनसंभवन्तीत्यर्थः हेतुमाह स्वभावधेर्निय ५

स्यच्च घटादिष्यलेप्रत्यक्षसिद्धत्वात्तदृष्टांतेनान्यत्रापिसकारणकत्वेनसिद्धेहे
तुनिषेधादयःसर्वेपिपक्षादृषिताः सकारणकस्यसहेतुकत्वात्सोस्तिप्रत्ययश्च नचस्वस्यस्वं
प्रतिकारणत्वंसंभवति पूर्वसत्वाभावात् नाप्यलीकस्यसत्वाभावेनपूर्वसत्वस्यैवाभावात्
दंडत्वघटत्वादिनैवकार्यकारणभावेसिद्धेस्वभाववर्णनाधिदूषणास्तेनिर्भावः ५ मूलं प्रवो
हेनादिसानेषः नवित्तास्येकशक्तिमान् ॥ तत्वेयत्नवतोभाव्यमन्वयव्यतिरेकयोः ६ टीका
ननु कार्यस्यावधित्वीकारे तदवधेरपितदवधित्वीकारआवश्यकोन्यथातदवधेरनादित्वेका
र्यस्याप्यनादित्वप्रसंगात् तथाचैवंक्रमेणावधिपरंपराभ्युपगमेनवस्थाप्रसंगः एवंचय
स्यांव्यक्तौयाव्यक्तिः पूर्वमुपलभ्यतेयादृशव्यक्तेरवधित्वंयादृशव्यक्तिंप्रतितादृशव्यक्तेरेव
कारणत्वमस्तुनतुतज्ज्ञानावेतज्ज्ञानीयस्य नचैवंसतिकार्येनियतज्ञानीयत्वंकथमुपपद्यते

त्तिवाच्यं कार्येनियतज्ञातीयत्वस्यतज्ज्ञातीयानुकूलशक्तिप्रयोज्यत्वाभ्युपगमादित्याशंक्यदूषयति
रिदूषणमाह प्रवाहेणादिमानिति एषःअवध्यवधिमद्वध्यादिरूपःकार्यकारणप्रवाहः
नक्षित्यादिमान्किंतुसनादिरित्यर्थः तथाचबीजांकुरादिवदनादित्वेननवत्त्वाभावदोषत्वेननेन
द्वध्यवधिपरंपरास्वीकारेक्षतिरितिभावः अतिरिक्तशक्तिकल्पनापेक्षयाअनुगतधर्मावच्छि
न्नयोःकार्यकारणभावकल्पेलघ्वीतिन्यादितिभावः ननुयद्विजातीयानानैकशक्तिम
त्वेनकारणतानतद्दाहेतणारणिमणीनांवह्निकारणतानस्यात्तृणत्वादिनारूपेणव्यभिचा
रेणकारणत्वादतआह तत्त्वइति तत्तेतृणादिवत्स्यादिकारणत्वेऽन्वयव्यतिरेकयोःसंतोर्य
लेवतामाव्यंयत्नःकार्यइत्यर्थः कार्यवैजात्यकल्पनयाकार्यकारणभावोनिर्वाच्यइतिभावः
ननुतत्तत्कारणजन्यतावच्छेदकतयापरस्परव्यावृत्तजातिविशेषानङ्गीकृत्यतत्तज्ज्ञास्यव

ह्निजन्यप्रतियोगितृणत्वादिनाहेतुत्वकल्पनेऽपिनैवंतत्कार्यकारणभावकल्पनायस्यालाघवेनव
ह्नित्वावच्छिन्नंप्रतियैकशक्तिमत्त्वेनहेतुत्वकल्पनमेवोचितंमितिचेन्न फूत्कारत्वाभावदृशा
यांतृणादिनीवह्नित्वावच्छिन्नप्रसंगात् नचफूत्कारादीनामपिसहकारित्वकल्पनान्नानुपपत्ति
रितिवाच्यं तथापिकारणतावच्छेदकावच्छिन्नयत्किंचित्समवधानस्यैवकार्योत्पत्तिप्रयोजक
तयाफूत्कारसमवधानेनारणीरपिवह्निजनकत्वापत्तेः तादृशजातित्वमभ्युपेत्यप्रत्येकंतृ
दृशजातित्वावच्छिन्नंप्रतिप्रत्येकंतृणादीनांहेतुतात्रयकल्पनेनैवानुपपत्तिः तृणत्वावच्छि
न्नेनफलजननेएवफूत्कारस्यसहकारित्वाभ्युपगमात् नचफूत्कारादिसंबंधानामपिएकश
क्तिमत्त्वेनैवनत्रहेतुत्वंवाच्यंतत्संबंधकालीनफूत्कारादिसंबंधेतादृशशक्त्यनुपगमेननैदव त

च्छिन्नव्याप्यहकारित्वाभ्युपगमेऽपदर्शितापत्तिरित्यपि वाच्यं तथासति तृणादिसंबंधानामनेकशक्तिभत्वेन
हेतुत्वमनावश्यकमित्यभावः अथ चविनिगमनाविरहेणानादृशीभयरूपेणा[illegible]हेतुत्वमवश्यमभ्युपेयमित्यपि
विभाव्यते तदा तृणादिसंबंधकालीनवायुसंयोगादीनामपि एकशक्तिभत्वेन हेतुतामादायविनिग
मनाविरहोदुर्वारः तथाचाग्निर्गौरवंस्यात् तस्मान्नजातित्रयमभ्युपेयं तथाविधकार्यकारणभाव
कल्पनमेवोचितं नचोपदर्शितरीत्याविनिगमनाविरहेणवायुसंयोगादीनामपिहेतुत्वापत्तिः
तथासतितृणासत्त्वकालेवायुसंयोगासत्त्वकालेघटित्वावच्छिन्नापत्तेर्दुर्वारत्वादित्यास्तांविस्तरः ६
मूलं एकस्यनक्रमः क्वापिवैचित्र्यंचसमस्यन॥शक्तिभेदेनभिन्नःस्वभावोदुरतिक्रमः ७
टीका नन्वेकमेवब्रह्मजगतःकारणमस्तु किंकारणभेदवैजात्याभ्यां नचैकमेवाद्वितीयमित्या
द्यभ्युपगमिभिः ब्रह्मणःसजातीयविजातीयस्वगतभेदशून्यत्वमवगम्यते स्रष्टव्यभूतानांतुप्रत्य

क्षादिभिर्वैचित्र्यमवगम्यते नचाविचित्रेकारणेकार्यवैचित्र्यंसंभवति अतिप्रसंगात् तथाक्रमोपि
प्यनुमानादुपलभ्यते नचनस्यव्यवस्थापकंकिंचित्पश्यामः तस्मादनेककार्यारंभेकारणंक्रमेणजन्मादिनी
यब्रह्मतोनसंभवतीतिवाच्यं तत्वतोब्रह्मणोद्वितीयत्वेपिमायांतुप्रकृतिंविद्यान्मायिनंतुमहे
श्वरमित्यादिश्रुतिभिः कारणत्वलिंगानुमानादिभिश्चमायासहायोपेतत्वाभ्युपगमात् नचे
मायांगीकारेद्वैतापत्तिः वास्तवस्यद्वितीयस्यानभ्युपगमात् अतएवद्वितीयमपिब्रह्ममायाव
शान्नानाकार्यकरंभविष्यति नचक्रमव्यवस्थापकाभावः मायागतानांशक्तिविशेषाणांव्यव
स्थापकत्वात् तस्मादद्वितीयब्रह्मतोनानाकार्यारंभेक्रमेणसृष्टिर्भविष्यतीतिवेदांतिनः सांख्या
स्तुएकप्रकृतिजन्यत्वेनसजातीयंपुरुषभेदेनविभिन्नंमहदहंतत्वमहत्तत्वापरपर्यायंधर्माधर्म
ज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्यशक्तिकंतदेकजगतः कारणंनादृष्टं तथाचनतत्सहकारितया
ईश्वरसिद्धिरिस्यादुः तदेतन्मतंदूषयितुमपिदूषयिष्यन्नादौयद्विजगत्साधनंधर्मादिकंनाभ्युपेयते

८

तत्राभ्युपेयतेतर्हिहेतं यदिनत्वबोधात्स्यंनास्तिनदानिष्टं यदिनत्वबोधात्त्यागपिव
स्तुगत्यानास्तिनदासंज्ञामात्रमित्यादिदोषान्मननसन्निधापयवेदांतिनेदूषयंति एकस्येति एकस्य
कारणस्यप्रयोज्यं [redacted] द्वितीयंदूषयंतिसमस्येनेति समस्यैकजातीयस्यकारणस्य
प्रयोज्यकार्यस्यवैचित्र्येनेत्यर्थः अत्रप्रयोज्यमित्यस्यवाध्याहारः तथाचक्रमिकारणंकिंजातीया
नांचकार्याणांनिर्वाहायतादृशकारणमदृष्टमावश्यकमितिभावः ननुवैकल्येसाजात्येपिवाकारण
स्यकार्यानुकूलशक्तिवैजात्यात्कार्यस्यक्रमोवैजात्यंचस्यादतआहशक्तिभेदोनचेति शक्तिभे
दस्तद्वैजात्यंकार्यवैजात्यप्रयोजकं यतःशक्तिपदार्थःकारणाभिन्नइत्यर्थः शक्तेःकारणाभिन्न
त्वेकारणवैजात्येशक्तिवैजात्यंदुर्घटमितिभावः ननुकारणाभेदएवशक्तीनामभ्युपेयतेअत
तीनोक्तदोषइतिचेन्नैवं हेत्वापत्तेः अपिचतावत्किंकारणानिकारणतावच्छेदिकावा आद्ये ८

एकमात्रकारणताभंगो द्वितीये कार्यभेदभंगः सामग्रीभेदादेव कार्यभेदस्यानुभवात् किंच
तत्पाविध्यनामाप्राक्षीः कल्पयित्वातत्तद्रूपेण हेतुत्वकल्पनविनिगमनाविरहेणा दृष्टसिद्धिरप्यू
हा नन्वेकस्मादेकजातीयाद्वास्वभावविशिष्टादेव कार्यक्षणक्रमो वैजात्यं चास्यादित्यन्तमा हस्व
भावइति दुरतिक्रमः दुस्त्याज्यः यस्स्वभावावच्छिन्नस्य पूर्वकार्यजनकत्वंतत्स्वभावावच्छिन्नस्यै
वोत्तरकार्यजनकत्वे पूर्वकालोत्पादापत्तिः उत्तरकार्यकालेच पूर्वकार्योत्पादापत्तिः एवमेकस्व
भावावच्छिन्नस्यनानाजातीयकार्यजनकत्वेपूर्वकालोत्पादापत्तिः एवमेकस्वभावावच्छिन्नस्यना
नाजातीयकार्यजनकत्वेसर्वकार्यंसर्वजातीयमेकजातीयंवास्यात् स्वभावभेदकल्पनेनुप्रागु
क्तमेवदूषणंप्राक्प्रतिरिक्तपदार्थस्यालीकत्वादितिआस्तांविस्तरः७ मूले विफलाविश्वचृ

त्तिर्नोभयदुःखैकफलानिवा॥ दृष्टलाभफलानापिविप्रलंभोपिनेदृशः ८ टीका ननुस्वर्गसिद्धौनत्सा
धनेयागेव्यापारस्तथासतिदृष्टसिद्धिःस्यात् सएवतुनास्त्यतआह विफलेति विज्ञेषांप्रेक्षावतांप्र व
त्तिर्नेविफलानापिदुःखफलाअतोभयत्रप्रेक्षावत्प्रवृत्तिःपूरणीया ननुभवतुतथाविधप्रवृत्तिः
सफलातथापितस्याःस्वर्गफलकत्वेमानाभावःपूज्ञाव्याहृदृष्टफलकत्वेनाप्युपपत्तेरित्यतआ
ह दृष्टलाभेति दृष्टोयोलाभःतत्फलापिनभवतितत्कथंनयाप्रवृत्त्यदर्शनात् तंप्रत्यपिचिरध्व
स्तेव्यापारंविनाजनकत्वानुपपत्त्याअदृष्टस्यावश्यकत्वादितिभावः ननुकेनेचित्प्रतारकेनस्व
र्गादिफलकतयायागादिकंप्रत्याप्तव्याप्यानुष्ठायचवंचितोलोकः प्रेक्षावानपिप्रवर्त्तेनइत्यतआह
विप्रलंभइति एतादृशप्रतारणापिनसंभवतीत्यर्थः कएतादृशोयःपरवंचनार्थंनानाविधकू
टसाधनैरुपन्यासादिभिःयावज्जीवमात्मानमवसादयेत् परवंचनाजन्यस्वल्पसुखोद्देशेनव ९

दुविधक्लेशोपप्रवृत्तेरनुचित्तत्वादिनिभावः ७ मूलं चिरध्वस्तेफलाद्यालंबनकर्मातिशयंविना॥
संभोगोनिर्विशेषाणांनभूतैःसंस्कृतैरपि ९ टीका नन्वेवंतुयागादेःस्वर्गजनकत्वंनयाप्यदृ
ष्टस्वीकारोव्यर्थः स्यादृष्टविनापित्तस्मात्तादृशकार्योत्पत्तिसंभवात् अनन्यथासिद्धनियतपूर्व
वृत्तित्वरूपकारणत्वाक्षतेरित्यतआह चिरध्वस्तमिति अतिप्रसंगमियाऽन्यत्रसर्वत्राव्यवहि
तपूर्ववृत्तित्वस्यकारणतायाशरीरघटकत्वात् चिरध्वस्तंपूर्वविनष्टंयागादिकर्मअतिशयंव्यापा
रंविनाफलाद्यालंबनसमर्थमितिकालांतरभाविफलोपपत्तयेयागादिव्यापारेकल्प्यनीमेपरि
शेषादृष्टमेवव्यापारःकल्प्यतइतियागस्यकारणत्वमुपजीव्येवादृष्टसिद्धिरितिभावः ननु
नहिकुसूलत्वादागध्वंसस्यव्यापारत्वमास्तांकृतंनकुसूलादृष्टकल्पनेन नचभावाभावयोरेकत्राज्ञ

नकत्वेननत्यागध्वंसस्यव्यापारत्वंयुक्तं अभावस्यजनकत्वेकारणीभूताभावप्रतियोगित्वेनभाव
स्यप्रतिबंधकत्वापत्तेः अन्यथाअनुभवस्यस्मृतिंप्रतिसंस्कारव्यापारकत्वानुपपत्तेरित्यदृष्टने
वस्वर्गादिफलजननेत्यागादेर्व्यापारइतिवाच्यं प्रतिबंधकसंसर्गाभावत्वेनैवकार्यमात्रंप्रतिहेतुत्वात्यो
संसर्गाभावत्वावच्छिन्नकारणतायाएवप्रतिबंधकशरीरघटकत्वात् स्वावच्छिन्नप्रतियोगिताकत्वसं
बंधेनाभावत्वावच्छिन्नकारणतायाअवच्छेदकोयोधर्मस्तदुच्चस्यैवप्रतिबंधकत्वपदार्थत्वात् नतूर्ध्व
वच्छिन्नकार्यतानिरूपितभावत्वावच्छिन्नकारणतानिरूपितस्यावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छि
न्नावच्छेदकतात्र्यधर्मवत्त्वस्यतदूर्ध्वावच्छिन्नप्रतिबंधकत्वपदार्थत्वादितिनिष्कर्षः नचायंप्रकृतेत्या
गध्वंसत्वेनकारणतायाअभावत्वेनाकारणत्वात्यागस्यप्रतिबंधकत्वापत्तेः कृतमदृष्टेन नचैवम
नुभवस्यापिस्मृतिंप्रतिस्वध्वंसव्यापारकत्वंस्यात् अत्रवदंति यागध्वंसस्यव्यापारत्वमभ्यु ९०

पेक्षस्वर्गत्वावच्छिन्नप्रतियोगध्वंसत्वेन हेतुत्वकल्पनेविशेष्यविशेषणभावेविनिगमनाविरहेणाध्वं
सत्वविशिष्टयागप्रतियोगिकत्वेनापि तत्र हेतुत्वस्यसंभवदुक्तिकल्पनागौरवप्रसंगात् अदृष्टस्वी
कारेतुनैवंतत्रविशेषणतानिरूपकविनिगमनाविरहात्संभवात् यागस्यादृष्टव्यापारकत्वनि
र्वाच्यमिति वस्तुतस्तुकर्मनाशजलस्पर्शादिनाश्यतावच्छेदकनिर्वचनानुरोधेनादृष्टसिद्धिः तू
थाहिनयागध्वंसत्वेनाश्यतावच्छेदकंध्वंसस्यध्वंसानभ्युपगमात् प्रकारांतरस्यतन्नाश्यतावच्छे
दकस्यादृष्टानभ्युपगमेऽनुभवः अदृष्टस्वीकारेतुधर्मत्वादेरवंतथासंभवदुत्यान्नोविस्तरः
एवमनुभवध्वंसत्वेनस्मृतिहेतुत्वपक्षेप्युक्तदिशागौरवप्रसंगात् सर्वांशेपेक्षात्मकज्ञानादपि
स्मरणापत्तेश्चनध्वंसद्वारकत्वमनुभवस्य किंतुसंस्कारद्वारकत्वमेव एतन्मतेतूपेक्षात्मकज्ञानत्वे
नसंस्कारहेतुत्वमात्रदर्शनादेवास्मरणादित्याद्यन्यत्रविस्तरः मन्यायात्वेनयायुक्त्यानदृष्टेन

अपि तस्याभीक्ष्णनिष्ठत्वेसमानाभावः भोग्यनिष्ठत्वापाद्युपपत्तेरित्यत्तऊर्ध्वमाह संभोगइति संभोगः सम्यक्भोगः प्रत्यात्मनियतभोगइतिभावः तत्र निर्विशेषाणांऽपि दृष्टरूपविशेषभूम्यादीनांसंस्कारैर्दृष्टरूपसंस्कारवह्निरपिभूतैः सकूचंदनवनितादिभिः सनिर्वर्तनीत्यर्थः तथाचभोग्यनिष्ठत्वाभ्युपगमेव्यधिकरणत्वेनप्रतिनियतभोग्यनिर्वाहकत्वेनस्याद्विनिफलसमाधिकरणमेवाभ्युपेयमते ऊर्ध्वमेव देवतामूर्तिरपिहारत्वेनेच्छेतीस्यात्तांविस्तारः ९ मूलं भावोयथातथाभावः कारणकार्यवन्मतः॥ प्रतिबंधोविषामश्रीतऽहेतुःप्रतिबंधकः १० टीका ननुभोग्यनिष्ठमेवास्तीद्रियंतिष्ठतु नचैवंभोग्यस्यप्रत्यात्मनियमानुपपत्तिः तदास्तीयंभोगंप्रतिभोग्यनिष्ठादृष्टविशेषाणांकरतलादिनिष्ठदाहानुकूलवह्निनिष्ठशक्तिविशेषाणामिव हेतुनाभ्युपगमेनाप्युपपत्त्यभावात् नचदृष्टांतासिद्धिः तथाविधशक्तिविशेषमानाभावइतिवाच्यं कारणत्वस्वभावत्वव्याप्यतामानाभावादिति सांप्रतमेवमभी ११

स्तत्र प्रतिबंधकत्वाभावसंभवदुक्तिकत्वात् भवत्वेवात्तत्र प्रतिबंधकत्वं तथापि शक्तिस्वीकारआवश्य
कः शक्तिमत्त्वेनैवतस्य प्रतिबंधकत्वंस्वीकारात् प्रतिबंधकत्वस्य कारणाभावसंपादकत्वरूपत्वादित्य
तआह भावोवेति भावोवन्ह्यादिर्यथाकारणं तथा मणेर्भावोपि तद्ग्राहकान्वयव्यतिरेकानुविधा
यित्वेतत्रसत्वात् कारणत्वस्यभावत्वव्याप्यत्वेदूषणमाह कार्यवदिति यथाध्वंसरूपाभावः कार्यः
तथाप्रकृतेपीत्यर्थः अन्यथाकार्यत्वस्यापिभावत्वव्याप्यत्वमभ्युपेत्यध्वंसस्याप्यकार्यत्वस्यांगीकार
स्योचितत्वप्रसंगात् इत्थंचभावत्वदभावस्यापिकारणत्वात्तद्विलंबादेवफलविलंबइतिकिंमूलेयेत्ति
भावः मणेर्दोषशक्तिनाशकत्वेनैवप्रतिबंधकत्वमित्यत्रदूषणमाह प्रतिबंधइति विषाभग्नौ
कारणाभावः प्रकृतेमणेर्दोषः तद्धेतुस्तत्प्रयोक्तातथाचमणेर्दोषरूपविषाभग्नौलक्षणंकार्यप्र
तिकूलकर्तृतथापुरुषादीनांप्रतिबंधकर्तृमणेर्दीनांतुकारणीभूताभावप्रतियोगित्वमितितदनु

१२ रोधेनापिनशक्तिविशिष्टस्यकीनिभावः नचहान्यावच्छिन्नंप्रतिनिमित्तत्वादिनानाप्रतिबंधकत्वक
ल्पनेगौरवादकुंठितत्वादिनिष्ठशक्तिविशेषमंगीकृत्यतस्यैवतत्रहेतुत्वकल्पनमुचितमितिवाच्यं
नमणिमत्वेउत्तेजकौषधादिसत्वेदाहानुत्पत्तिप्रसंगात् तत्रशक्तेस्तकुंठितत्वहेतुमण्यादिसत्वेना
कुंठितत्वाभावतयाकुंठितत्वरूपकारणाभावच्छेदकावच्छिन्नशक्तिरूपकारणस्याभावान्नच
८ तत्रोत्तेजकानांकुंठनानुकूलत्वांगीकारान्नदोषइतिवाच्यं तथापिनावश्यकल्पनेगौरवंलाघवा
न्मण्यभावत्वेनहेतुत्वकल्पनस्योचितत्वात् नचैवंमन्तेपिउत्तेजकसत्वेपिदाहोनस्यादितिवाच्यं
उत्तेजकाभावविशिष्टमण्यभावस्यहेतुत्वाभ्युपगमात् सचविशिष्टाभावः उत्तेजकसत्वेमणिस
त्वेउत्तेजकाभावरूपविशेषणाभावात् क्वचित्तुविशेष्याभावात् यथामण्यभावेसुत्तेजकेचसती
त्यन्यत्रविस्तरः २० मूलं संस्कारःपुंसएवेष्टःप्रोक्षणाभ्युक्षणादिभिः॥ स्वगुणाःपरमाणूनां १२

विशेषाः पाकजादयः॥ ११॥ टीका ननुवन्ह्यादौन्तत्कारणांतेनैवसहोत्पन्नानिस्यैवशक्तिः
सान्नास्तिचेत्तमास्तुआधेयशक्तिस्तुस्यात् तथाहिव्रीहीनप्रोक्षन्तिव्रीहीनवहंतीत्यत्रनेनप्रोक्ष
णस्यावघातेहेतुत्वंश्रूयतेतच्चेहनीतस्यकालोत्तरभाविव्यापारंविनानुपपन्नमितितत्र
प्रोक्षणादिजन्यतच्छक्तिविशेषव्यापारोव्रीह्यादावेवकल्प्यतेयोपदृष्टफलार्थितयाक्रियतेसत्त
दृष्टान्तिशयजनकदृष्टनियमात् नचैतादृशनियमस्याप्रयोजकत्वात्तत्रास्यदृष्टविशेषरूपव्यापा
रकल्पनेप्रेक्षावतांचित्तमितिवाच्यं अदृष्टस्यव्रीह्यसंबद्धतयातदवघातेप्रयोजकत्वात् नचस्वाश्र
यसंयोगित्वंसंबंधःव्रीह्यंतरसाधारण्यात् एवंचप्रवृत्तेयागादिनःशक्तिविशेषरूपेव्यापारए
वभीमांसकैःचंदनादौस्वीक्रियतांनस्वदृष्टविशेषआत्मनीत्यतआहसंस्कारइति प्रोक्षणाभ्यु

क्षणादिभिः व्रीहिप्रोक्षणात्तद्वांतरभेदात्मकाभ्युक्षणादिभिः व्रीहिनिष्ठैः संस्कारैः दृष्टविशेषफलकक्षणाः
पुरुषप्रयत्नेभ्यः पुरुषस्यैवक्रियत्वेनतु व्रीहिपुरोडाशादिरूपइति पूर्वपक्षार्थः तत्र हेतुरुक्तः सचयज्ञसंक
ल्पे व्रीहिनिष्ठायाएकत्वस्याः स्वीकारे यत्किंचि द्व्रीहिनाशेनतन्नाशेव्रीह्यंतरस्योपयोगोनस्यात् नच
यावत्समाप्तिकारणनाशायनाशकत्वागौरवात् प्रतिव्रीहिशक्ति[illegible]कल्पनेचगौरवात् नैचैव
मस्यवधातेप्रतिव्रीह्यस्याश्रयसंयोगित्वरूपपरंपरासंबंधेनैव हेतुत्वयोग्यप्रोक्षितव्रीहावपितद्दा
यत्तिरितिवाच्यं प्रोक्षितत्वाएववव्रीहयोग्यवधात्वापकल्प्यंतइतिवाक्यशीषादिबलतः प्रोक्षितव्रीही
णामपिविशिष्यकारणत्वाभ्युपगमात् स्वाश्रयनिरूपितविजातीयसंयोगस्यैवतत्रकारणतावच्छे
दकसंबंधत्वाभ्युपगमाद्दोषाभावात् नचैवंनानापुरुषीदृशकर्मणाश्रुतादृष्टस्थलेप्यदृष्टवि
शेषस्यकर्तृत्वंवाभ्युपगमप्रसंगः एकत्रतदभ्युपगमेलाघवात् फलेवैप्यधिकरण्यंतु व्रीह्यादा
वपिसमानमितिचेन्मैवं फलसामानाधिकरण्यपक्षेप्यदृष्टस्यमानापुरुषकर्तृकएकपिदृष्टेश्य

कगभाभ्राद्धादावेकस्मिन्पित्तर्थदृष्टस्वीकारे लाघवसंभवात् नचैवंसतिविनिगमकाभावः कृत्तिसा
मानाधिकरण्यफलसामानाधिकरण्योभयपक्षेपि लाघवादिति वाच्यं लाघवात्साक्षात्संबंधेने
वफलंप्रत्यदृष्टस्यहेतुत्वकल्पनापाएवादृष्टस्यफलसामानाधिकरण्यपक्षेविनिगमकत्वात् नचा
स्मिन्पक्षेप्यदृष्टंप्रतिश्राद्धादेः परंपरासंबंधेनहेतुत्वप्रसक्तेर्गौरवमितिवाच्यं इच्छाविशेषात्मक
श्राद्धादेरदृश्यस्याव्याप्तिरिक्तविषयत्वाविशेषसंबंधेनादृष्टंप्रतिहेतुत्वकल्पनेगौरवाभावात्
नचैतादृशविषयत्वाविशेषमानाभावः तदनभ्युपगमेश्राद्धसमानाकारकालीनरीणेच्छायामपि
श्राद्धव्यवहारापत्तेरिस्यास्तांविस्तरः ननुप्रोक्षणादिनाव्रीहीणांशक्तेनीकारेपित्तदारंभकपरमा
णावश्यंव्रीहिप्रयोजकशक्तिविशेषोभ्युपेयः अन्यथाव्रीहित्वंव्रीहीणांपरमाणुत्वंनभंगात्
परमाणुषुविशेषांतराभावात् नदारंभकपरमाणुष्वपिव्रीहित्वमेवोत्पद्यतेनयवादृत्तिनियमासं
भवादित्यतआहस्वगुणादिति परमाणुनांयेपाकजाजात्यपःस्वगुणास्तएवोत्पद्यतेइत्यर्थः तथाच

विलक्षणरूपरसादिविशिष्टाः परमाणवएववीह्यारंभकाइत्यभ्युपगमेनैवसर्वेषामंजस्येत्तस्य
मोजकविलक्षणशक्तिस्वीकारेनियुक्तिकइतिभावः ९२ मूलं निमित्तभेदेसंसर्गादुद्भवानुद्भवौ
दृष्यः ॥देवताःसंनिधानेनप्रत्यभिज्ञानंतोपिवा ९२ टीका यत्रपाकजविशेषाःनसंभवंतिजलेवायु
प्रभृतिषुक्वचिदुद्भूतस्यगंधादिकंक्वचिन्नेत्यत्रविनिगमकांतराभावादनुकूलाशक्तिरेवनियामिका
वश्यमभ्युपेया एवंदेवताप्रतिमादौप्रतिष्ठाजन्यभ्रांडालादिस्पर्शनाश्यः शक्तिविशेषोवश्यम
भ्युपेयोन्यथाचंडालादिस्पर्शेपितत्पूजातः फललाभप्रसंगात् शक्तिस्वीकारेतुनैवं चंडालादि
स्पर्शेनतस्याः नाशमभ्युपगमात् नदापूजाफलासंभवात् नचपूजाजन्यफलेप्रतिप्रतिष्ठाजना
दृष्टविशेषस्यैवस्वीकारेनतस्य हेतुत्वंनतादृशशक्तिः चंडालस्पर्शेचदृष्टनाशादेवनपूजाफल
मितिवाच्यं ततदृष्टस्यव्यधिकरणतयाचंडालादिस्पर्शेननाशासंभवादित्यतआह निमित्तभेदेनेति. ९४

अदृष्टविशेषादेवोभूतत्वादयोविशेषानुशङ्केः कल्प्यमानोरवादित्तिभावः वस्तुतोलिङ्गभेद
संसर्गात्तुभूतानुभूतरूपादित्तः उभयवानुभयवाउभूतरूपाहयःउस्यधर्मेइत्यर्थः तथाचोभू
तरूपत्वावच्छिन्नंप्रत्युभूतरूपत्वादिनाहेतुत्वकल्पनेनैवोभूतानुभूतरूपाद्युस्यत्तिसिर्वाहा
नगौरवेकल्पनेयुक्तमित्तिभावः उभूतत्वंचात्रनजातिः शुक्लत्वादिनासांकर्यात् अनुभूतत्वंतुशु
क्लत्वादिव्याप्यजातिःनाना नचोभूतत्वमेवशुक्लत्वादिव्याप्यजातिर्नानाकुतइतिवाच्यं उभूतत्व न
स्यनानात्वाभ्युपगमेबहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नंप्रतिउभूतरूपहेतुतायांव्यभिचारप्रसंगात्
तत्रोभूतत्वस्याननुगतत्वेनानुगत[illegible]कारणतावच्छेदकत्वासंभवात् अनुभूतत्वंनानानदभो
वभ्रोभूतत्वमितिपक्षेतुमाननुगमः तत्तदनुभूतत्वकूटाभावत्वविशिष्टरूपत्वस्यैवतत्रानुगत
कारणतावच्छेदकत्वसंभवादित्तिदिक् एवमित्यादिद्वितीयकल्पेदूषणमाह देवत्तादित्यादि अत्रदे

१५ देवताइत्युत्तरं पूजाफलदाप्यिन्यइत्तिपूरणीयं तथाचसंनिधानेनप्रतिष्ठान्यदेवताभेदाहिज्ञान
जन्यादृष्टेनदेवतापूजाफलहायिन्यइत्यर्थः नचैवंप्रतिमायांचंडालस्पर्शेसत्यपिपूजानन्तरफ
लापत्तिः चंडालस्पर्शेनतत्रतदृष्टनाशाभ्युपगमात्फलासंभवात् नचादृष्टस्यव्यधिकरण
तयाकल्पनादृष्टनाशकल्पनमित्तिवाच्यं तदृष्टनाशंप्रतिचंडालस्पर्शस्यस्वाश्रयनिरूपितवि
जातीयसंयोगसंबंधेन हेतुत्वाभ्युपगमेनानुपपत्तेरभावादित्याहित्यपमेवोह्यं प्रतिष्ठातत्तत्कृत्यं
दृष्टमनभ्युपगम्याप्याह प्रत्यभिज्ञानतइति इयंदेवताप्रतिष्ठितेतिप्रतिष्ठितत्वज्ञानादित्यर्थः त
थाचस्वाश्रयनिरूपितविजातीयसंयोगघटितसामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकचंडा
लादित्यर्शाभावविशिष्टतादृशज्ञानंपूजाफलहेतुः अतोनतत्रचंडालादित्यर्शेपूजाफलापत्ति
रितिभावः नचप्रतिष्ठितत्वज्ञानस्यकारणत्वेमानाभावः प्रतिष्ठितंपूजयेदित्तिविधेरेवतत्रमा १५

नत्वात् अत्रप्रतिष्ठितस्य फलविशेषजनकतायानेनरूपेणातिप्रसङ्गस्यावश्यकतयातिप्रसङ्गवत
स्याप्यावश्यकत्वकथनादित्यादिकमपिस्वयमूह्यं १२ मूलं जयेतरनिमित्तस्य वृत्तिलाभा
यकेवलं ॥ परीक्ष्यसमवेतस्य परीक्षाविधयोमताः १३ टीका यत्तुतुलापरीक्षाविधानात्तु
लादीशक्तिर्जायतेतथाचनमनोन्नमनाधिकनिमित्तनन्मतंदूषयितुमाहजयेतरेति जयस्त
दितरः पराजयः तस्मिन्निमित्तस्यादृष्टविशेषस्य परीक्ष्यपुरुषसमवेतस्य वृत्तिलाभाय
त्यक्तिलाभाय परीक्षाविधयोमताः स्वीकृतादित्यर्थः नथाचपरीक्षाविधिर्जयपराजया
न्यतरजनकअदृष्टविशेषउत्पद्यतेतेनचतत्पान्यत्रनिर्वाहइतिभावः नचविनिगमका
भावात्तुलायामेवशक्तिःकथंनाद्रियतइतिवाच्यं परस्परसंयुक्तानेककाष्ठादिरूपतुला
यांशक्तिकल्पनापेक्षयापुरुषसमवेतादृष्टकल्पनेलाघवस्यैवविनिगमकत्वादित्यास्तांविस्तरः १३

मूलं कर्तृधर्मानियंतारश्चेतिनाचमरुवत्॥अन्यथानपवर्गस्यादसंसारेध्रुवोः १४
टीका ननुसिध्यत्वदृष्टंभोगनियंतृत्वापत्तेस्तमानाधिकरणंनत्वात्मसमवेतंसुखदुःखा
दिलक्षणाभोगस्यात्मत्वधर्मत्वासंभवात् तस्यबुद्धितत्वधर्मत्वात् तथाहि आत्मात्तावत्पुरु
षश्चेतनत्वादृष्टाप्रसवधर्मित्वविवेकित्वात्त्रिगुणत्वासंगित्वादिधर्मवान् कूटस्थनित्यः पु
ष्करपलाशवन्निर्लिप्तोऽन्यधर्मानाश्रयोऽकारणमकार्यश्चस्वाभाविकंचैतन्याश्रयश्च॰
अन्यथाबुद्धितत्वेचैतन्याभिमानानुपपत्तेः स्वाभाविकलौहित्येनकुसुमगतेनकुसुमसंसर्गेवस्फ
टिकेलौहित्याभिमानात् चैतन्याश्रयश्चधर्मधर्मिणोरभेदात् बुद्धितत्वंतुसत्वरजस्तमोगुणा
नामनादिपरिणामिनित्यप्रकृतेर्जडायाः परिणामविशेषोमहत्तत्वापरपर्यायस्तत्वैवधं
र्मादृष्टादिकं अन्यथापुरुषस्यकर्तृत्वादिमत्वेनदेवभासकत्वानुपपत्तेस्यात् तद्धर्मस्यैवदी

पघटादौ न दृश्यभासकत्वदर्शनात् चेतनोहंकर्तेति एकत्वप्रतीतिस्तु बुद्धितत्वेज्ञानवत्त्वविषया
पुरुषेचकर्तृत्वविषयापुरुषेबुद्धितत्वस्यबुद्धितत्वेचपुरुषस्यप्रतिबिंबलक्षणासंनिधानता
भ्रांतिरेव चैतन्यकर्तृत्वयोरभिन्नाधिकरणकत्वसाधारणादितिसांख्याः तन्मतंदूषयितुमाह क
र्तृधर्माइति नियंतारः कृतिसमानाधिकरणानियामकादृष्टादयः कर्तृधर्माः दृश्यात्रयस्यैवध
र्माः नियामकस्यनियम्यसामानाधिकरण्यनियमादितिभावः चेतितात्वसएवनइति नः अस्मा
कं नयायिकानांचेतितात्वचैतन्याश्रयः सएवकर्तैव अन्यथाकृतेः स्वसमानाधिकरणज्ञानसाध्यत्वं
नस्यात् चेतनोहंकर्तेतिप्रतीतेर्बाधकंविनाभ्रमत्वायोगश्चेत्यादिस्वयंबोध्यं धर्माधर्मौबुद्धि
तत्वधर्मत्वेदूषणांतरमप्याहअन्यथेति बुद्धितत्वेधर्माधर्मादिस्वीकारेइत्यर्थः अनपवर्गः
स्यात् अनिर्मोक्षप्रसंगादित्यर्थः नित्यबुद्धितत्वधर्माधर्मेज्यभीगाश्रयस्यसर्वात्मनः सर्वदा
सत्त्वादितिभावः इदंचबुद्धितत्वस्यनित्यत्वंगीकारपक्षेबोध्यं तस्यानित्यत्वाभ्युपगमेदोषमाह

असंसारीत्यबाधवदिति संसारस्यैववोच्छेदप्रसंगइत्यर्थः ग्रहिबुद्धितत्वस्यानित्यत्वंतदानन्त्यमव
श्यंवाच्यं अनित्यभावस्यजन्यत्वनियमात् एवंचबुद्धितत्वोत्पत्तिपूर्वकालेबुद्धितत्वाभावेनतदाश्रि
तधर्माधर्मादेरप्यभावात् बुद्धितत्वोत्पादस्यैवासंभवः तदनुत्पत्तौतुतत्कार्यशरीरेंद्रियादेरभावेन
संसारस्योच्छेदप्रसंगइत्तिभावः १४ मूलं नान्यदृष्टस्मरस्यान्योनैकभूतमुपक्रमात्॥ वासनासंक्रमो
भास्तिनचमत्यंतरेस्थिरे १५ टीका ननुभवंतुधर्माधर्मादयश्चेतनधर्माः चेतनस्तुनित्यविभुः किं
तुशरीरमेवगौरोहंज्ञानाभीत्यादिप्रतीत्यागौरत्वज्ञानत्वयोः सामानाधिकरण्यग्रहात् अडभूतकार्य
त्वेपिशरीरस्यज्ञानवत्वंतुमदशक्तिवदितिवदंतंचार्वाकंकारणमनेदूषयति नान्यदृष्टमित्यादि अन्य
दृष्टस्यान्येनस्मरणादेवदत्तेनानुभूतस्यप्रसदत्तेनस्मरणप्रसंगादनुभवस्मृत्योः सामानाधिकर
ण्यनवश्यमेष्टव्यं शरीरस्यचैतन्याभ्युपगमेतु बाल्यशरीरेणानुभूतस्ययौवनशरीरेस्मरणंनस्यात्
बाल्ययौवनदशावस्थितयोः शरीरयोः दशाभेदेनभेदात्कारणस्यानुभवस्यकार्यस्मृत्यव्यधिकर १७

णाद्यादित्तिभावः ननु दृश्यभेदेप्येकमेवशरीरमत्तीनद्दीप्रहृस्यत्तआह नैकभूतमित्ति बाल्यौवनशरीरं नैकमित्यर्थः तत्रहेतुमाहत्तपक्रमादित्ति पूर्वशरीरनाशादित्यर्थः परिमाणनाशंप्रत्याश्रयनाशस्य हेतुत्तथायौवनदृश्यंबालशरीरनाशनभ्युपगमेत्त हृत्तिहृस्यत्त परिमाणस्याप्यनाशीभ्युपेयः आश्रयनाशंविनापरिमाणनाशासंभवात् तत्रत्तस्यहेतुत्वात्ते तथाचयौवनदृश्यंनद्दपलंभप्रसंगः दीर्घत्तहृस्यपरिमाणानुपलंभप्रसंगश्च परिमाणवत्तिपरिमाणांतरानुत्पत्तिनियमेनैवात्रैककालावच्छेदेनपरिमाणद्वयस्यविरुद्धत्वादित्तिभावः ननुस्मरणंप्रत्तिस्याश्रयक्रमन्यत्वरूपपरंपरासंबंधेनानुभवजन्यघासनाप्यास्त्वपि हेतुत्तंकल्प्यनीयं तथाचबाल्यशरी[redacted]रानुभूतस्यपक्किंचित्तद्वयघानुभूतत्तनियमेनतेनसंबंधेनबाल्यशरीरानुभवजन्यवासनायायौवनशरीरेपित्तत्वान्नानुपपत्तिरित्यत्तआह वासनासंक्रमोनास्तीत्ति पूर्वक्रमपरंपरासंबंधेनवासनायाः हेतुत्वेनसंभवतीत्यर्थः तथाचमात्रानुभूतस्यगर्भस्थेनस्मरणप्रसंगदृत्तिभावः ननूक्तपरंपरासंबंधेनीपादानगत्तवा

सम्भवाद्धेतुत्वाभ्युपगमान्नदोषइत्यतआह नचभवत्यन्तरंस्थिरइति क्षणिकतथा वासनासंक्रम
पस्मरणानभ्युपगमान्नरमुपपद्यतेक्षणिकपरमाणुरूपसमूहरूपपूर्वशरीरस्यान्तादृशोत्तरशरीरोपा
दानत्वान्नस्थिरपक्षेतन्मतेकरादीनामेवशरीरोपादानत्वान्नथाचछिन्नेकरादौतेनानुभूतस्यवं
उशरीरेस्मरणंनस्यान्नखंडशरीरंकरादेरुपादानत्वाभावेनतेनसंबंधेनकरगतवासनाधानसंभा
वाद्विनिभावः १५ मूलं नवैनास्यंविनातत्स्यान्नतस्मिन्ननुभावतत्र विनातेननतत्सिद्धिर्नध्रुवंनि
श्चयंविना १८ टीका ननुक्षणिकतापक्षएवतन्मतेपूर्वशरीरस्यास्मरणसंभवात्तत्राह नवैनास्यं
विनेति वैजात्यंकुर्वद्रूपत्वजातिंविनानस्यान्नक्षणिकत्वेस्यात्नक्षणिकत्वेनसिध्येद्धिसत्यावत्त
अयंभावः क्षणिकत्वंतदैवसिध्येन्नयदिकुर्वद्रूपत्वंजातिरस्ति अन्यथाघटत्वावच्छिन्नेप्रतिहेउ
त्वाद्विनैवहेतुत्वंकल्प्यनीयं नचतत्संभवतिकुसूलस्थबीजादप्यंकुरोत्पादापत्तेः सहकार्यंतर
कल्पनेनगतंक्षणिकत्वेनस्थिरपक्षेपिबाधकाभावाद्विनाकुर्वद्रूपत्वजातिर

वश्यमंगीकार्यमिति मन्यस्तुकुर्वद्रूपत्वंजातिः तथासतिकाक्षणिरित्यनाहननास्मिन्निति तस्मिन्
कुर्वद्रूपत्वेसतिअनुमानेनभवेत् धूमादिनावन्ह्यादेरनुमानेनभवेत् वह्निधूमयोर्व्याप्तिग्रहासं
भवादित्यर्थः अयंभावः उपस्थितंवह्नित्वादिकंविहायकेनचिद्धर्मेणज्ञानेनवह्नेर्हेतुत्ववद्रूपाप्यि
तधूमत्वादिकंविहायकेनचिद्धर्मेणकार्यतावच्छेदकतावाच्या तथाचधूमत्वावच्छेदेनवह्निकार्यंग्रहेनु
कूलतर्काभावेनवह्निधूमयोर्व्याप्तिग्रहासंभवइति ननुचार्वाकस्यमतेनतदिष्टमेवेत्यतआह
विनातेनेति तेनविनाअनुमानेनविनाननुसिद्धिः क्षणिकत्वसिद्धिः तथाचानुमानस्यप्रमा
णत्वेनक्षणिकत्वसिद्धिरेवनस्यात् कुर्वद्रूपत्वाद्यनुमानेनैवसामग्रीप्रविष्टस्यततः प्राग्विद्य
मानात्तच्चसविकल्पकंकल्प्यंनचक्षणिकमितिसविकल्पकंकस्यचिदप्यस्तीत्यर्थः अपिचत्री
हित्वंविहायकुर्वद्रूपत्वंयदिवेत्तर्हिहायत्रीहित्वस्यकुशूलस्थेसतेनसामग्रीनिविष्टेनधान्येनहित

पसचेनकुर्वद्रूपत्वंअजानिःसोकर्मादिनिसंक्षेपः १८ मूलं स्थैर्यदृष्ट्योर्नसंदेहोनप्रामाण्येविरोधतः।
एकतानिश्चयोयेनक्षणैर्नेनस्थिरेमतः १९ टीका ननुमास्तुक्षणिकत्वंस्थैर्येतुनासिध्यत्तिसंदेह
परावृत्तत्वादित्तित्राह स्थैर्यदृष्टेरिति ननावत्तस्थैर्येसंदेहः सएवायंघटइत्तिप्रात्यभिज्ञारूप
स्यत्तनिश्चयस्यसत्वात् नाप्तित्तथाविधप्रत्यभिज्ञारूपदृष्टौसंदेहोनुव्यवसायेननानिश्चयात्
ननुत्तानप्रामाण्येसंदेहस्तत्राहनेत्ति प्रामाण्येज्ञानप्रामाण्यमात्रेनसंदेहः किंतुप्रत्यभिज्ञा
प्रामाण्येसइत्यत्तआह एकतेति येनप्रमाणेनविरुद्धधर्मविरहादिनाक्षणिकस्यैकेघटस्यैकक्षणेनना
नात्वंकिंत्वेकतानिश्चयःतेनप्रमाणेनस्थिरेस्थिरपक्षेपिनानावर्त्तिनोघटस्यैकतानिश्चयोमतः संभवति
एकस्यनानादेशानानात्वेनवर्त्तनानाकालसंबंधस्याप्यविरोधात् एवंचविरुद्धधर्मविरहेणतत्प्रामाण्य
निश्चयेनतत्प्रामाण्येपिसंदेहइतिभावः १७ ननुउपदर्शितरीत्यासिध्यत्वदृष्टंपरंनुतस्यपरलोक
कारणत्वमनुपपन्नंकारणत्वेस्यापारमार्थिकत्वेनपारमार्थिकादृष्टवृत्तित्वासंभवात् नचकारणा १९

त्वं पारमार्थिकं नथात्वेनस्य नीलादि वत्सर्वसाधारण्यापत्तेरनआह हेनुशक्तिमिति पारमार्थिक
क नीलादिवैधर्म्येण कारणत्वमपारमार्थिकमित्यभिप्रायेनसम्यक् कार्यकारणभावाभावे नीला
ग दैरप्यपारमार्थिकत्वापत्तेः एवकारणंहिंगनवन्निरस्यान्न एवकारणंहिशशविषाणवच्छून्यात्
नेत्रोद्यमानाभावेन नसंभवतिहिनीयंस्यादित्याह मूलं हेनुशक्तिमनादृस्यनीलाद्यपिनव
द्यु स्तुमन्न ॥नसुकंनत्रनछकमितिसारणनकिं २६ हेत्विति ननुभवत्कारणत्वमपिपारमार्थिकं
नत्युनःस्वाभाविकमेववाच्यं नथाचकारणात्सर्वकार्योत्पत्तिप्रसंगः स्वभावसिद्धस्यनस्यसर्वदा
विद्यमानत्वान्नत्रआह नछकमित्यादि तछकंसहकारियुक्तं तत्कारणंनत्रकार्येशक्तं नथाचस
दकार्यभावान्नसर्वदाकारणात्कार्योत्पादनप्रसंगइतिभावः ननुकारणत्वस्यस्वाभाविकस्यनीला
दिवत्सर्वसाधारण्यप्रसंगइत्यत्रेष्टापत्तिमाह इतिसाधारणमिति नहिनीलादेःसर्वत्रविद्यमान

त्वेधीत्तादावपिन्नदापन्नेरपितुसर्वैनीलत्वादिनाप्रतीयमानत्वंकारणत्वेधीर्दृष्टाधारण्यंसंभवत्येवम
र्वैः कारणस्यकारणत्वेनप्रतीयमानत्वात् दंडःसकलकार्यकारणस्यादितिसाधारण्येत्यादकत्वाभावादिति
भावः १७ मूलं पूर्वभावोहिहेतुत्वमीयतेयेनकेनचित् ॥ व्यापकस्यापिनित्यस्यधर्मिधीरन्यथानहि १९
टीका नन्वदृष्टंनात्मसमवायिकारणंकिंआत्मनोनित्यत्वयाकालिकव्यतिरेकासंभवेनयदन्वयेयदन्वयो य
द्व्यतिरेकेयद्व्यतिरेकस्तत्कारणमितिकारणलक्षणासंभवादित्यत्राह पूर्वभावोहीत्ति हेतुत्वंकारणत्वं
पूर्वभावःअनन्यथासिद्धनियतपूर्ववर्तित्वरूपंनतुव्यतिरेकगर्भमित्यर्थः ननुमास्तुलक्षणापूर्विकृत
या व्यतिरेकापेक्षाग्राहकत्वमात्वस्यात् अन्वयव्यतिरेकसहचारेणाग्राहकत्वादतआह मीयतेयेनकेन
चित्यादि व्यापकस्यापिनित्यस्यनिरुक्तहेतुत्वंयेनकेनचित् अन्वयव्यतिरेकघटितभिन्नेनमीयतेगृह्यते
तथाचकारणतांग्राहकमपिनव्यतिरेकानुविधायित्वंकिंत्वन्वयानुविधायित्वमेवेतिनात्मनिहेतुतायत्ता

संभवइतिभावः ननुव्यतिरेकघटितभिन्नधर्मस्यकारणताग्राहकत्वेप्रमाणाभावइत्यतइदमाहधर्मि
धीरित्यादि अन्यथाव्यतिरेक[redacted]घटितस्यकारणत्वाग्राहकत्वेऽाकाशादिरूपधर्मिसिद्धिर्न
स्यादित्यर्थः अन्वयंभावः यदिव्यतिरेकाघटितस्यनकारणताग्राहकत्वंकिंतुव्यतिरेकघटितस्यैवत
तोदागगनादेस्तदभावेनकारणताग्रहस्यासंभवान्नकारणत्वाभावेशशृंगसमवायिकारणजन्योभा
वकार्यत्वादित्याद्यनुमानेनशशृंगसमवायिकारणतयागगनादिसिद्धेर्विलोपप्रसंगइतिगगनादिसि
ध्यन्यथानुपपत्त्याव्यतिरेकाघटितस्यैवकारणताग्राहकत्वमुपेयमिति वस्तुतस्तु व्यतिरेकस्य
हवारस्यकारणताग्राहकत्वपक्षेपिनक्षतिः कारणतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकका
रणाव्यतिरेकसहचारस्यकारणतावच्छेदकतादात्म्यसंबंधावच्छिन्नप्रतियोगिताकव्यतिरेकस्य
मेदलक्षणस्यघटादौसुलभत्वेननदंनभावेनव्यतिरेकसहचाराग्रहसंभवादितिबोध्यं ग्रंथ

२१ कृदाश्रयस्तु व्यक्तिरेकगर्भकारणत्वपक्षेऽपि वृत्तिगगनादीनां तादात्म्येनाधिकारणत्वे दुर्वचं का
र्यतावच्छेदकसंबंधेन कार्यसंबंधिनिविशेषणतया वर्त्तमानस्याभावस्य कारणतावच्छेदकतत्तत्सं
बंधावच्छिन्नप्रतियोगितानवच्छेदकरूपवत्त्वस्य कारणताशरीरत्वात् वृत्त्यनियामकसंबंधस्याभा
योगि वप्रतियोगितानवच्छेदकतयातादात्म्यसंबंधावच्छिन्नप्रतियोगिताया अप्रसिद्धेः कारणताशरीरेऽत्यं
ताभावप्रतियोगित्वस्य प्रवेशेतुसुतरांनतादात्म्येन कारणत्वसंभवन्नित्येनसंबंधेनात्यंताभावाप्रसि
द्धेरिति नचवृत्त्यनियामकस्याभावप्रतियोगितानवच्छेदकत्वेपितत्तत्कार्यप्राक्कालावच्छिन्नतत्तत्कार
णतावच्छेदकसंबंधेनप्रतियोगित्व्यधिकरणत्वमेवनिवेशनीयंनतुकारणतावच्छेदकतत्तत्संबंधा
वच्छिन्नेतिवाच्यंतथासतिवृत्तिगगनादेःतादात्म्येन हेतुत्वेसुघटमितिवाच्यं तथासतिकालिकसंबंधेनश
ब्दादिकंप्रतिकारणत्वेनस्यात् कालेकालिकसंबंधेनप्रतियोगिव्यधिकरणप्रसिद्धेरितिसंक्षेपः१९

मूलं इत्येषासहकारिशक्तिरसमाख्यादुरुन्नीतिर्नोमूलत्वात्प्रकृतिः प्रबोधभयतोयविद्येतियस्यो
दिता ॥ देवोसौविरतप्रपंचरचनाकल्लोलकोलाहलःसाक्षात्साक्षितयामनस्यभिरतिंबध्नातुशां
भोमम ॥३०॥ इतिकुसुमांजलीप्रथमस्तवकः॥१॥ ॥टीका एवंचमायाविद्यादिपदमप्यदृष्ट
परः निर्निमायिकंजगदित्यादिवाक्यविरोधोपीत्याहुः इत्येषेति इत्येषासदृशलक्षणायस्ये
श्वर्यसहकारिरूपाशक्तिः कारणं असमाअन्यासदृशीअतोमायेत्युदिता असमत्वेहेतुमा
हदुरुन्नीतिर्नइति दुःखेननिरूप्यत्वादित्यर्थः मूलत्वात्सर्वेषांकारणत्वात् प्रकृतिःप्रकृतिप
दवाच्या तेनसांख्योक्तातिरिक्तप्रकृतिर्दूषिता प्रबोधः तत्त्वज्ञानं तस्यभयात् [redacted] तस्यवि
रोधात् अविद्येति उदितेतिसंबंधः एतेनवेदांतोक्तातिरिक्तामूलाविद्यादूषिता असौदेवः
विरतप्रसंगस्य रचनायाः कल्लोलस्यपरंपरायास्यकोलाहःकिंवदंतीयत्रतादृशः साक्षितया

२२ स्यमनेवनिर्णायकीभूयमनमननसिसाक्षादभिरतिंसाक्षात्कारस्यानेवधीनुज्ञानयन्तु २० इतिप्र
थमस्तबकव्याख्या मूलं प्रमायाःपरतंत्रत्वात्सर्गप्रलयसंभवात् तदन्यस्मिन्नाम्नायानै
विधांतरसंभवः १ टीका नन्वाप्तत्वदृष्टेतथाप्यनेश्वरसिद्धिः नचाचेतनं चेतनाधिष्ठितमेवका
र्यजनकमितिनियमबलात्तदनुरोधेश्वरसिद्धिरितिवाच्यं तादृशनियमेप्रमाणाभावात् नचा
मोक्षत्वंशब्दप्रामाण्येतंत्रसिद्धिवेदप्रामाण्यान्यथानुपपत्त्येश्वरसिद्धिरितिवाच्यं तस्यचतंत्रसि
द्धप्रमाणाभावात् नित्यनिर्दोषत्वेनैवप्रामाण्यसंभवात् इत्यतआह प्रमायाइति प्रमायाःप्रमा
त्मकज्ञानस्य परतंत्रत्वात् गुणजन्यत्वनियमात् स्वयंभावः शब्दप्रमांप्रतिवक्तृपदार्थज्ञा
नंगुणविधयाहेतुःस्वन्यस्यतथात्वासंभवात् तथाचेश्वराभावे वेदाकर्तृत्वंशब्दप्रमोत्पादः
स्यात् वक्तुरभावेनोपदर्शितकारणाभावाद्विस्रुपेदर्शितकारणासंपत्त्यर्थमीश्वरेस्वश्यमं
गीकर्तव्यइति मनुप्रवाहाविच्छेदात्सूर्वपूर्वाध्यापकयाकार्यज्ञानमेवगुणविधयाहेतुरितिने २२

श्वरसिद्धिरतआह सर्गप्रलयसंभवादिति सर्गप्रलययोर्व्यवस्थाप्यत्वादित्यर्थः एवंचप्रलये
अध्यापकोच्छेदेसर्गादौप्राथमिकैरस्मर्यवेदेवाकार्यस्मार्तंगुणाःसवक्काभगवानित्यर्थः मनुस
र्गादौपूर्वसर्गीयार्जितयोगजधर्मवशाद्विनासाक्षात्तन्नाशेषपदार्थाःकपिलादयोवक्कारोभवि
ष्यंतिकिमीश्वरेणास्यतआह नहन्यस्मिन्निति प्रतिप्रतिसर्गंतस्यैकत्वेसएवभगवाननेकत्वेनुत्ता
वेकल्यनामांगीरवमितिभगवानेकएवकल्प्यनीयः यदिवासर्वत्रएवसर्गादौकश्चिद्वेदवक्का
तर्हि स्वीक्रियतेँतहूचसिनाभ्यासइत्यर्थः तस्मादीश्वरंविनानवेदप्रामाण्यमित्याह नविधांतरसंभ
वइति अपिच प्रमात्वंगुणजन्यत्वादिनाभ्युपेयं तथाचतद्बुद्धेरपिगुणजन्यत्वेसिद्धिः नचैभव
त्वेवंप्रामाण्यस्यपरतस्त्वेतदेवनसंभवतिमीमांसकैःप्रामाण्यस्यस्वतस्त्वाभ्युपगमात्तथाहि प्रामाण्य
स्यस्वतस्त्वंप्रामाण्यग्रहप्रतिबंधकाभावकालीनप्रामाण्याश्रयीभूतज्ञानग्राहकसामग्रीग्राह्यत्वं
तच्चगुरुमतेज्ञानेस्वप्रकाशंतथाचतदेवात्मानंप्रामाण्यंचगृह्णातिप्रामाण्येप्रामाण्यग्रहप्रति

२३ बंधकाभावकालीनप्रामाण्याश्रयीभूतयाथन्नज्ञानविषयत्वरूपंस्वतस्त्वं मुरारिमतेनुव्यवसायेन
प्रमात्वविशिष्टज्ञानंगृह्यतइतिप्रामाण्यग्रहप्रक्रियेबंधकाभावकालीनप्रामाण्याश्रयज्ञानविष
यकयावत्तज्ञानग्राह्यत्वरूपंस्वतस्त्वं भट्टमतेज्ञाततालिंगकानुमितिग्राह्यत्वरूपंस्वतस्त्वं
मित्यादिज्ञानंगृह्यतइतिज्ञाततालिंगकानुमितिग्राह्यत्वरूपंस्वतस्त्वमबाधितमतोनप्रामाण्यानु
मित्यनुरोधेनगुणजन्यत्वसिद्धिरितिचेन्न तदुत्तरंप्रामाण्यसंशयात्घटत्ववद्विशेष्यकत्वावच्छिन्न
घटत्वप्रकारकत्वादिज्ञानंविनाप्रथमानुव्यवसायेभानासंभवेनमुरारिमतस्यनिर्युक्तिकत्वाच्च
एवंभट्टमतमपिनसाधु ज्ञाततालिंगकानुमितिर्यत्रनासिद्धंतत्रज्ञाततालिंगकानुमित्याप्रामाण्यग्रहस्यसु
नं तरामसिद्धत्वात् नचज्ञाततालिंगकघटोजातइतिप्रत्यक्षसिद्धाप्रत्यक्षज्ञानोत्तरंचघटोघटत्वप्रका २३
रकघटविशेष्यकज्ञानविषयः घटत्वसमानाधिकरणघटत्वप्रकारकज्ञाततालिंगकानुमा

४ रूपप्रामाण्यप्रकारकत्वादि

त्यप्रामाण्यग्रहइतिवाच्यं ज्ञातोघटइतिप्रत्यक्षस्यज्ञानविषयत्वेनैवोपपत्तेर्ज्ञातताया पदार्थसाधकत्वात् अन्यथाघटद्रष्टइतिप्रतीतिविषयत्वेनेदृक्ख्यातिरिक्तपदार्थस्यापिसिध्यापत्तेरित्याद्यन्यत्रविस्तरः स्यादेतत् प्रामाण्यग्रहस्तु प्रमाणगुणाजन्यस्तानुमानतः कर्पवर्णानांनित्यत्वावर्णसमुदायरूपवेदस्यापिनित्यत्वानित्यनिर्दोषवेदजन्यत्वेनैवशब्दबोधप्रमाणयोः प्रामाण्यग्रहसंभवात्तस्मादलमीश्वरेनेतिचेन्न उत्पन्नोगकारोविनष्टोगकारइत्यादिप्रतीतीनांविनागकारादेरुत्पत्तिविनाशस्वीकारमनुपपन्नतयातेषांतथाविधानित्यत्वस्वीकारस्यावश्यकत्वात्।।न चतादृशप्रतीतीनांपरंपरासंबंधेनवायुसंयोगोत्पत्त्यादिविषकत्वेनैवोपपत्तौवर्णानित्यत्वास्वीकारेणोपगमोव्यर्थोनरवसोयंगकारइतिप्रत्यभिज्ञायाःस्वरसिकप्रामाण्यमपीतिवाच्यं।।गकारादिप्रत्यक्षत्वस्यवायुसंयोगकार्यतावच्छेदकत्वापेक्षयागत्वादेरेववायुसंयोगकार्यतावच्छेदकत्वेलाघवात्प्रत्यभिज्ञातुसाताव

लंबनानापेदार्थेत्यन्यत्रविस्तरः॥१॥ ॥मूलं॥वर्षादिवज्रवोपाधिर्दृष्टिरोधः सुषुप्तिवत्॥उद्भिदृश्चिकवद्रूपं मायावत्समुपादयात्॥२॥ ॥टीका॥ननुसतिप्रलयेऽकरीत्येश्वरःसिध्यति॥सएवतुनास्तिप्रमाणाभावा

॥२५॥

त्तत्स्वीकारेहोरात्रमव्यवहितहोरात्रपूर्वकमितिनियमभंगापत्तेःसर्गादिनाहोरात्रेतद्धाधात्॥ब्राह्मणजन्यत्वेसतिब्राह्मणीजन्यस्यैवब्राह्मणत्वाभ्युपगमेनसर्गाद्यकालेसमुत्पन्नस्यतज्जन्यलाभावेनब्राह्मणत्वाभावात्॥इदानींतनानांसतरांतज्जन्यत्वाभावसंभवात्॥एवंब्राह्मव्यवहारविलोपापत्तिश्चप्रयोजकवृद्धयोरभावेनसंकेतग्राहकप्रयोज्यवृद्धप्रयोजकवृद्धस्यव्यवहाराभावात्॥घटादिनिर्माणेपुण्यस्यपूर्वंपूर्वंतद्दर्शनसापेक्षस्यसर्गाद्यकालेऽसंभवेनघटादिसंप्रदायोच्छेदकप्रसंगाच्चेत्यतआह॥वर्षादिवदिति॥यद्होरात्रंतदव्यवहितहोरात्रपूर्वकमितिनव्याप्तिः॥सहचारदर्शनमात्रेणव्याप्तिग्रहस्वीकारेवर्षादिनमव्यवहितवर्षादिनपूर्वकमित्यादिव्याप्त्यादेरपिप्रसंगादित्यतआह॥वर्षावदिति॥तत्रकर्कसिंहान्यतरावस्थितरविसंक्रमसंबंधपूर्वकत्वमुपाधिरतोनतथाव्याप्तिरितिचेतर्हिप्रकृतेपि

॥२६॥

राम

तुल्यंअहोरात्रेनाव्यवहिताहोरात्रपूर्वकत्वेसाध्येव्यवहितसंसारपूर्वकत्वरूपोपाधेः सत्वादित्यतआह॥
भवोपाधिरिति तथाचोपाधिसत्वान्नतथाविधानुमानादहोरात्रेव्यवहिताहोरात्रपूर्वकत्वंसाधयितुंश
क्यतइतिभावः॥कालस्यभोगुव्याप्यत्वंदूषयति॥वृत्तिरोधइति॥वृत्तिरोधःअदृष्टरोधःसुषुप्तिवत्सुषु
प्तिकालवत्॥तथाचसुषुप्तौलयथाकतिपयादृष्टानांनिरोधः॥तथाकदाचित्समस्तादृष्टनिरोधोसंभ
वतीति तथाविधानुमानंप्रयोजकमितिभावः॥इदानीतनानांब्राह्मणत्वाभावप्रसंगइतिबाधकंनिर
स्यति॥उद्भिदिति॥यथाउद्भिदाख्यःशूककविशेषस्तंडुलकणेभ्यस्तथाविधशूककविशेषबीजेभ्यश्चोत्पद्यते॥
गोमयाच्चवृश्चिकोत्पत्तिः॥तथासर्गाद्यकालेवैलक्षण्यादृष्टविशेषात्तूइदानींचब्राह्मणाब्राह्मणस्योत्पत्तिरि के
त्यर्थः॥नचेवंसतिब्राह्मण्यस्यहेतुतायांसर्गाद्यकालीनब्राह्मणोव्यभिचारइतिवाच्यं॥सर्गाद्यकालीनब्रा
ह्मणव्यावृत्तवैजात्यावच्छिन्नंप्रतिब्राह्मणत्वेनहेतुत्वस्यकल्पनीयतयानुपपत्तेरभावात्॥अदृष्टविशे
षजन्यतावच्छेदकजातिस्तुसर्वब्राह्मणसाधारणीतस्याइदानींब्राह्मण्यादृतेमानाभावात्॥नचेवं

सतिब्राह्मणंविनाप्यदृष्टविशेषेणसर्गाद्यकालेब्राह्मणोत्पत्तेरिदानीमप्यदृष्टविशेषबलाद्ब्राह्मणंविनाब्रा
ह्मणोत्पत्त्यापत्तिरितिवाच्यं॥अदृष्टविशेषेणफलेजननीयेतथाविधकालविशेषब्राह्मणान्यतरस्य
॥२५॥ सहकारितयानुपपत्यभावात्॥विजातीयकारणजन्यत्वेवैजात्यं स्यादितिचेन्न॥अदृष्टविशेषस्यसजा
तीयतत्तद्योजकस्यसत्वेसर्वजात्यस्यवारयितुमशक्यत्वादित्याद्यन्यत्रविस्तरः॥प्रलयाद्युपगमेव्यव
हारोच्छेदापत्तिरूपबाधकमुद्धरति॥मायाबदिति॥घटानयनादिसंपादकस्यसूत्रसंचारिसदारुपुत्र
प्रतिघटमानयेत्यादीनियोगस्यकारकात्मायाविनीयथेतरेषांशक्रियाहृदयः॥तथासर्गादीप्रयो
ज्यप्रयोक्रेजीवाद्यवस्थितनानाशरीराधिष्ठितात्घटाद्यानयनसंपादकघटमानयेत्यादिवाक्यनियो
द्वि ज्यकेश्वरादेश्चेतरेषांशक्रियाहृदयइत्यर्थः॥आदिपदाद्बुद्धीन्द्रियाद्यस्मदादृष्टीपार्जितशरीर ॥२५॥
वताभगवतेवेत्यर्थः॥२॥ ॥मूलं॥जन्मसंस्कारविद्यादेःशक्तेःस्वाध्यायकर्मणः॥क्वासदर्शनतोऽक्वा
सःसंप्रदायस्मर्यते॥२॥ ॥टीका॥ननुवर्षाप्रथमदिनंप्रमाणसिद्धंभवप्रथमदिनंप्रलयासिद्धं राम

वसिष्ठमित्यतः प्रलयसाधकमाह॥जन्मेत्यादि॥संप्रदायस्य वेदादिसंप्रदायस्य ह्रासः॥अत्यंतोच्छेदः॥नि
यतामनुनीयतांवेदादिसंततिरत्यंतमुच्छिद्यते॥ध्वंसप्रतियोगित्वात्॥प्रदीपसंततिवदित्यनुमानादिति
भावः॥अत्रपक्षेहेत्वसिद्धिपरिहारायेमाह॥जन्मेत्यादि॥तत्रजन्मह्रासः॥पूर्वमिवमानसीनांअपत्यार्थं
प्रावृत्तमैथुनसंभवानांचप्रजानामभावात्॥संस्कारह्रासः॥पूर्वमिवचरुप्रभृतिषुतथाक्षेत्रेषुगर्भप्रभृ
तिषुचसंस्काराभावात्॥यथाकथंचिदपत्योत्पत्यनंतरमेवाफनिकानांलोकव्यवहारमाश्रित्ययथाक
थंचित्संस्कारकरणात्॥विद्याह्रासः॥प्रागिवसहस्रशाखस्यषडंगवेदस्याध्ययनाभावात्॥क्वचिदे
कस्याःशाखायाःसत्वात्॥आदिपदाच्छ्रुतिह्रासोधर्मह्रासश्चतत्रब्राह्मणापूर्वेमुंडवृत्तयःइदानींसेवा
दिवृत्तयइति॥धर्महासश्चपूर्ववत्॥ततस्त्रियात्॥ततोहिपात्इदानींत्वेकपात्शूद्रादिमलव्याकु
लइतिक्रमेणवोद्यः॥शक्तेर्बलरूपायाह्रासःभीमादीनामिवास्मदादेरभावात्॥बुद्धिरूपायाह्रासः॥
व्यासादीनामिवाभावात्॥स्वाध्यायोध्ययनसामर्थ्यंतस्यह्रासःतेषामिवाभावात्॥कर्मयागादितस्या

पकार्यः प्राचीनैरिवाकनिकैर नादृष्टात्र॥३॥ ॥मूलं॥कारंकारमलौकिकाद्भुतमयं मायावशात्संहरन्
हारंहारमपींद्रजालमिवयः कुर्वन्जगत्क्रीडति॥तंदेवंनिरवग्रहस्तवदभिध्यानानुभावंभवं विश्वस्यैसुंक
वंशिवंप्रतिनमन्भूयासमंतेषपि॥४॥ ॥इतिद्वितीयस्तवकःसमाप्तः॥२॥ ॥टीका॥॥द्वितीयस्तवका
र्थसंग्रहश्लोकमाह॥कारंकारमिति॥यःपरमेश्वरअलौकिकाद्भुतमयंलोकनिर्माणयोग्यंविलक्षणंजगत्
त्र॥कारंकारंकृत्वाकृत्वामायावशात्तत्तत्कालसहकृतसंजिहीर्षासमवहिताहृष्टवशात्संहरन्हारं
हारंहत्वाहत्वाकुर्वन्क्रीडति॥तंदेवंनिरवग्रहस्तवदभिध्यानानुभावंनिरवग्रहोनिःप्रतिबंधस्तवता
पुरुषारणंअभिध्यानानुभावइच्छानुभावइच्छाभवोयस्मातादृशंभवंतंगन्मूलकारणंशिवंप्रतिनमन्
नमस्कारंकुर्वन्अंतेषुअंतकालेषुभूपासमित्याशंसा॥५॥ ॥इतिद्वितीयस्तवकव्याख्यासमाप्ता॥२॥ ॥२६॥
॥मूलं॥योग्यादृष्टिःकुतोयोग्येप्रतिबंदिःकुतस्तरां॥ब्रूयोग्यंवाध्यतेऽङ्गंक्वानुमानमनाश्रयम्॥१॥ ॥
टीका॥॥नन्वनुपलब्धिरूपबाधकसत्वात्कथमीश्वरसिद्धिः॥यद्धिचेंद्रियकपदार्थेसिद्धावेवानुपलब्धिर्बाधिका राम

नन्वतींद्रियेश्वरसिद्धौवितिविभाव्यतेतदातींद्रियशशशृंगाभावस्याप्यसिद्ध्यापत्तिः॥ यद्विचयोग्यानुपलध्या
शशशृंगाभावोमसिद्ध्यतिःअपितुसाधकाभावाच्छशशृंगादेरभावः॥अत्रतुवक्ष्यमाणेश्वरसाधकानुमा
नस्यजागरूकत्वाददोषइत्युच्यते॥तदाईश्वरेस्वीयेष्टसाधनताज्ञानशरीरायभावेनकर्तृत्वाभावसिद्ध्या
कर्तृस्यापिशशशृंगत्वापत्तेरित्याशंक्यानुपलब्धिमात्रस्याभावसाधकत्वेनिप्रसंगात्॥योग्यानुपल
ब्धिरेवाभावसाधिकास्युपेयासाचेश्वरेनसंभवतीत्यभिप्रेत्याह॥योग्यादृष्टिरितिः॥योग्यादृष्टिरयोग्ये
परमेश्वरेकुतःतथाचेश्वरोप[illegible]लंभाप्र[illegible]सिद्ध्याप्रतियोगितयाप्यतरप्रतियोग्युपलंभकयावत्सामग्री
विशिष्टप्रतियोग्युपलंभाभावात्मिकायायोग्यानुपलब्धेरीश्वराभावग्राहिकायाप्रसिद्ध्यानेश्वरेयोग्या
नुपलब्धिर्बाधिकेतिभावः॥यदिनातींद्रियप्रतियोगीकाभावसिद्धिस्तदायोग्यशशशृंगाभावसिद्धिरपि
मास्त्विति प्रतिवंदिसमाधानमाह॥वंदिरिति॥यतः कायोग्यंशशशृंगंवाध्यतेअयोग्यंशशशृंगनबाध्यते
किंतुयोग्यानुपलब्धिवशात्शशेएवशृंगाभावःसिद्ध्यतिइत्यतःप्रतिवंदिःकुतस्तरां॥अतींद्रियशशशृं

गाभावोपिनसिद्धो दितिप्रतिवंदिःस्फुटएवनास्तीत्यर्थः॥तथाप्युपदर्शितरीत्येश्वरेकर्तृत्वाभावसाधनेकथंपार
मार्थिकेश्वरसिद्धिरित्याशंक्याह॥कानुमानमिति॥तस्यासिद्धेस्तीयेष्टसाधनताज्ञानाभावशरीरादयभाव
हेतुकंकर्तृत्वाभावानुमानेनसंभवतिआश्रयासिद्धेः॥नहिपक्षज्ञानंविनानुमितिःकेनाप्यभ्युपेयतेपक्ष
ज्ञानस्यापिहेतुत्वात्॥सिद्धेतुधर्मेणा हकप्रमाणबाधइतिभावः॥[redacted]
[redacted]॥१॥ ॥मूलं॥व्यावर्त्याभाववत्तेवभाविकीहिविशेष्य
ता॥अभावविरहात्मत्वंवस्तुनःप्रतियोगिना॥२॥ ॥टीका॥विकल्पैरख्यात्यापरमेश्वररूपपक्ष
ज्ञानसंभवादित्यतआह॥व्यावर्त्येति॥व्यावर्त्यकर्तृत्वंततद्भाववत्तेवभाविकीपारमार्थिकीविशेष्य
ताईश्वरे अश्रयतेतिकारिकापूर्वार्द्धार्थः॥अयंभावः॥उपदर्शितरीत्याईश्वरेकर्तृत्वाभावसाधनेकर्तृ
त्वाभावेनेश्वरस्यपारमार्थिकत्वं॥अन्यथासदसतोःसंबंधाभावेनपारमार्थिककर्तृत्वाभावस्यापारमा
र्थिकेश्वरसंबंधाभावेनतत्साधनासंभवात्॥व्यावहारिककर्तृत्वाभावएवसाध्यतइतिवाच्यं॥अलीककर्तृ

[redacted]शदृष्टानुपात्तवस्तुशून्येविकल्प्यः॥ अस्तंतासत्यपिह्यर्थेज्ञानंशब्दःकरोतिहि॥

॥२७॥ राम

र्तृत्वाभावसिद्धेः पारमार्थिकेश्वराभावसिद्ध्यविरोधिनयातथाविधसिद्धेरनुद्देश्यत्वादिति॥अथेश्व
रेकर्तृत्वाभावेनसाध्यतेअपित्वनुपपत्त्यादिवशादीश्वराभावएवसाध्यतेतथाचकुपारमार्थिकेश्व
रसिद्धिरित्यतआह॥अभावेतिवस्तुनः॥वस्तुनएवतथाचेश्वराभावसिद्धौईश्वरेअ भावप्र
तियोगित्वमपिसिद्ध्यतितच्चाभावाभावात्मकत्वस्वरूपंवस्तुनएवेति ईश्वराभावसिद्धावपिई
श्वरस्यपारमार्थिकत्वमप्रत्यूहमेवेतिभावः॥ननुकथंप्रतियोगित्वमभावाभावात्मकत्वरूपं॥अन्यो
न्याभावप्रतियोगिन्यव्याप्तेः॥तत्प्रतियोगितावच्छेदकेचातिव्याप्तेःअन्योन्याभावाभावस्यतत्प्रति
योगितावच्छेदकस्वरूपत्वादितिचेन्नःप्रतियोगित्वपदेनसंसर्गाभावप्रतियोगित्वस्यविवक्षित
त्वात्॥केचित्तु॥अभावबुद्धिंप्रतिप्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्यहेतुत्वादी
श्वरज्ञानंविनाईश्वराभाव ज्ञानासंभ वात्तदुपपत्त्यर्थमीश्वरज्ञानमवश्यमंगीकार्यमितिपारमा
र्थिकस्येश्वरस्यावश्यकता॥अन्यथातज्ज्ञानासंभ वात्॥नचासत्ख्यात्यात्मकेश्वरज्ञानादेवतदभा

कु० मी०

॥२८॥

वबुद्धिर्भविष्यतीतिवाच्यं॥असतोभानानंगीकारेणअसत्ख्यातिसाम ख्याअकल्पनोपेतयातथात्वासंभवा
दितिवदंति॥३॥ ॥मूलं॥दुष्टोपलंभसामग्रीशशशृंगादियोग्यता॥नतस्यांनोपलंभोस्तिनास्तिसानुपलं
भने॥३॥ ॥टीका॥योग्यानुपलब्धिर्नयोग्यस्यानुपलब्धिःजलपरमाणोःपृथिवीत्वाभावग्रहप्रसंगात्॥ना
पियोग्येनुपलब्धिःसंभेपिग्रावाभावप्रत्यक्षप्रसंगात्॥अपिनुयोग्याचसानुपलब्धिश्चेति॥अनुपलब्धो
योग्यताचप्रतियोगितद्व्यापेतरप्रतियोगिग्राहकयावत्समवधानेनचैषायोग्यताशशशृंगाभावग्रहेसंभ
वतिशशशृंगोपलंभसामग्रीहिदुष्टादोषघटितातस्यांसत्यांकथंशशशृंगानुपलंभःअनुपलंभेचसतिना
दृश्योपलंभसामग्री[redacted]वनास्तीतिकथंयोग्यतेत्याहदुष्टोपलंभेतिशशशृंगादि
योग्यताशशशृंगादिस्थलेअनुपलब्धियोग्यतादुष्टादोषघटितानुपलंभसामग्रीशशशृंगोपलंभस्यभ्रमत्वे ॥२८॥
नतज्जनकसामग्र्यादोषघटितत्वनियमात्॥प्रतियोगिग्राहकस्यैवोक्तयुक्त्यायोग्यतात्वनिर्वचनात्॥तस्यांस
त्यांनोपलंभः॥उपलंभाभावइतिनास्तिअनुपलंभने[redacted]अनुपलब्धोसाध्वीक्षायोग्यतेवनास्तीत्यर्थः॥ राम

तथाचपदादादृग्सामग्रीतदानप्रतियोग्युपलंभाभावःयदितुनादृग्सामग्रीतदाननिरुक्तयोग्यानुपलब्धि
रितिनयथाशशृंगाभावसिद्धिस्तथानिरुक्तयोग्यानुपलब्धिविरहादीश्वराभावोपिनसिद्ध्यतीतिभावः॥३॥ ॥
मूलं॥इष्टसिद्धिःप्रसिद्धेर्हेतुसिद्धिरगोवरे॥नान्यासामान्यतःसिद्धिर्जातावपितथेक्षणा॥४॥ ॥टीका॥ननु
तथाप्यात्मानोनसर्वज्ञाःनसर्वकर्तारश्चेतनत्वादहमिवेत्यनुमानादीश्वरेसर्वज्ञत्वाद्यभावसिद्धौफलतःपा
रमार्थिकेश्वराभाव सिद्धिरित्यतआहइष्टसिद्धिरिति॥प्रसिद्धेर्हेतुप्रसिद्धेआत्मनिचेत्रात्मादाविवियावत्॥
उपदर्शितानुमानेनपक्षीकृतेइतिशेषःइष्टसिद्धिःसिद्धसाधनम्॥ननुभगवानेवपक्षइत्यतआहहेतुसि
द्धिरित्यादि॥अगोचरेअज्ञातेश्वरात्मनिहेतुसिद्धेर्हेतोरज्ञानमित्यर्थः॥तथाचतस्याज्ञानेनतत्रहेतुज्ञा
नासंभवान्नानुमानंसंभवतीतिभावःनन्वात्मत्वेनसान्यतः सिद्धिर्विवक्षितातत्राहनान्येति॥सामान्यतआ
त्मत्वेनरूपेणअन्याईश्वरात्मविषयिणीसिद्धिरपिनेत्यर्थः॥तेनरूपेणापितुनग्राहकसामग्यभावादिति
भावःनन्वात्मत्वंनसर्वज्ञवृत्तिजातित्वात्गोत्वादिवदित्यनुमानादात्मत्वेसर्वज्ञादिवृत्तित्वाभावेसिद्धेफलतःपा

रमार्थिकेश्वराभावसिद्धिरित्यतआह जातावपीति॥आत्मत्वजातौसर्वज्ञवृत्तित्वाभावे साध्येपितथैवपू
र्ववदेवसासिद्धिरित्यर्थः॥अयंभावः॥आत्मत्वजातौसर्वज्ञवृत्तित्वाभावे साध्येसर्वज्ञाप्रसिद्धातवृटि
तसाध्याप्रसिद्धिः॥यत्किंचिदज्ञवृत्तित्वेसाध्येनुचेत्राद्यात्मानमादायसिद्धसाधनमितिनोपदर्शितानु
मानावक्राग्रहीतिदिक्॥४॥ ॥मूलं॥आगमादेःप्रमाणत्वेबाधनादिनिषेधनं॥आभासत्वेतुसैवस्यादाश्रयासिद्धिरुक्ता॥५॥ ॥टीका॥ननुभवदभिमतागमादिसिद्धेरीश्वरज्ञानंसंपाद्यतत्रासर्वज्ञत्वादिकंसाधनीयमित्यतआह॥आगमादेरिति॥आगमादेर्यदिप्रामाण्यंतर्हिबाधनादेरीश्वरपक्षकसर्वज्ञत्वाद्यभावसाध्यकानुमानादेर्निषेधनावतारः॥आगमादेवसर्वज्ञत्वादिविशिष्टेश्वरसिध्यातदनुमानेबाधानारादितिभावः॥आभासत्वेआगमादेरप्रामाण्येसापूर्वोक्ताआश्रयासिद्धिरुक्तैवदुरुद्धेरेवेत्यर्थः॥ततआभासप्रतिपन्नेसर्वज्ञत्वाद्यभावःसाध्यइत्यत्रनुव्यावर्त्याभावतैवेतिकारिकोक्तायोज्याइतिभावः॥५॥ ॥मूलं॥दृष्यदृष्योःक्रमेदेहीभावाभावविनिश्चयात्॥

अदृष्टिबाधितेहेतौ प्रत्यक्षमपिदुर्लभंगद्य॥ ॥टीका॥नन्वतींद्रियपदार्थानभ्युपगंतृणांचार्वाकानामतीं
द्रियपदार्थविलोपप्रसंगरूपबाधकासंभवेनानुपलब्धिमात्रादेवेश्वराभावसिद्धिःस्यादित्यतआह॥
दृष्यदृष्ट्योरिति॥दृष्यदृष्ट्योरुक्तदृश्यनतदृश्यनाभावान्यतरयोःसतोभावाभावविनिश्चयात्॥तत्र
तदभावान्यतरनिश्चयात्॥कुसंदेहःसंदेहोनभवतीतिकारिकापूर्वार्द्धार्थः॥अयंभावःचार्वाकमतेय
द्यनुपलब्धिबलादेवाभावविनिश्चय स्तदाऽनुमानाप्रामाण्यमभ्युपगंतृणांचार्वाकाणांवह्यादेरुक्त त
रकोटिकसंभविनातोवह्निव्यवहारइतिमनुपपन्नंस्यात्उपदर्शितैवह्निवह्यभावयोरन्यतरनिश्च युक्त
येनवह्निसंदेहासंभ वादिति॥अनुपलब्धेरभावनिश्चायकत्वेदूषणांतरमप्याह॥अदृष्टिबाधितइ
ति॥अदृष्टिबाधितेकेषांविदनुपलब्ध्यानिश्चितभावकेहेतौप्रत्यक्षमपिदुर्लभंस्यात्॥प्रत्यक्षप्र
माणमपिदुर्लभंस्यादित्यर्थः॥गोलकाद्यदृश्यनेनगोलकाभावसिद्ध्याप्रत्यक्षप्रमाणमपिव्याहन्ये
तेतिभावःनचोपलब्धिर्दोषाभावोनाभावसाधकः किंत्वुपलब्धिसामान्याभावएवसाधकस्तथा

चचार्चीकीपगोल कात्मकेंद्रियादेःकेषांचिदुपलब्ध्यानोक्तरीत्यानदभावसिद्धिरितिप्रत्यक्षप्रमितिकर
णाबाधेननानुपपत्तिरितिवाच्यं॥तथासतिघटवतिभूतलेघटाभसारणानंतरंतदभावप्रत्यक्षानु
॥३०॥ दयप्रसंगात्॥भूतलेघटस्यविद्यमानतादशायामुपलब्धिसत्वेनतत्रोपलब्धिसामान्याभावासत्वा
त्॥तस्मादनुपलब्धिर्नीभावसाधिकाकिंतुयोग्यानुपलब्धिरेव॥साचत्रहृतेनास्तीतिमेश्वराभावसि
द्धिरित्यादिस्वयमूह्यं॥एतेनसांख्यमीमासकावपिनिरस्तौवेदितव्यौयोग्यानुपलब्धेरभावेश्वराभावा
सिद्धिरित्यास्ताविस्तरः॥६॥ ॥मूलं॥शंकाचेदनुमास्त्येवनचेच्छंकाततस्तराम्॥व्याघातावधिराशंका
तर्कःशंकावधिर्मतः॥७॥टीकामनन्वनुपलब्धिमात्रस्याभावासाधकत्वेपिसर्वत्रानींद्रियोपाधिसंदेहे
नव्यभिचारसंदेहात्व्याप्तिनिश्चयोदुर्लभःस्यात्तथाचनानुमानंप्रमाणमितिकुतस्तरांईश्वरसिद्धिरित्या ॥३१॥
शंकामपजिहीर्षुराह॥शंकाचेदिति॥व्याप्तिनिश्चयेप्रतिबंधकीभूतोव्यभिचारसंशयः॥पदिकालांतरी
पदेशांतरीपधूमएवैत्युच्यतेतदाअनुमास्त्येवअनुमानंप्रमाणमावश्यकमेव॥अन्यथाकालांतरीपदे राम

शांतरीयधूमोपस्थितेरसंभवेन धर्मिज्ञानाभावात्तथाविधसंशयासंभवात्॥यदिचनकालांतरीयदेशां
तरीयेसंदेहस्तदोपलभ्यमानधूमेवह्निसामानाधिकरण्यनिश्चयात्॥व्यभिचारसंदेहासंभवेननतरां
कुतरामनुमानप्रमाणमावश्यकमेवेतिकारिकारार्थः॥ननूपलभ्यमानधूमरूपत्वधूमत्वेनव्यभिचा
रसंशयःसंभवतितत्प्रतिबंधकस्यधूमत्वावछेदेनाव्यभिचारनिश्चयस्यासत्वात्॥तथाव्याप्तिनिश्चयासं
भवेनकथमनुमानंप्रमाणंतत्राहतर्कः शंकाविधर्मतइति॥तथाविधव्यभिचारसंशयप्रतिबंधकइत्य
र्थः॥ननेवंसतितर्कमूलीभूतव्याप्तिनिश्चयस्यापितर्कंप्रयोज्यतयान्नवस्थापतिरित्यतआहव्याघाता
वधिराशंकेति॥व्याघातःधूमादिविशेष्यकयावद्यन्वयव्यतिरेकानुविधायित्वज्ञानंव्यभिचारशंका
कारणाभावादिप्रयुक्तस्तर्कविघटकशंकाविरहस्तत्रतर्कोस्वेतर्कस्यानपेक्षतयानोपदर्शितानवस्थे
तिभावः॥तर्कश्चाहार्योरोपविशेषःसूत्रितोमहर्षिणागौतमेन॥अविज्ञाततत्वेर्थेकारणोपपत्तितस्त
त्वज्ञानार्थमूहस्तर्कइति॥अत्रतर्कइतिलक्ष्यनिर्देशः॥सचतर्कणंतर्कइतिव्युत्पत्त्याप्रसंगरवनछप्त

कु०मो० णंकारणोपपत्तिरितिः॥कारणंव्याप्यंतस्योपपत्तिराहार्योरोपस्ततस्तेनऊहःव्यापकस्याहार्योरोपः॥
आहार्यंव्याप्यारोपेणाहार्यंव्यापकारोपइतियावत्॥यथाऽग्नेरुपरिवह्निव्याप्यधूमवान्स्यात्तर्हिमा
॥३१॥ न्स्यादितिधूमारोपेणवह्न्यारोपः॥फलमाह॥तत्त्वज्ञानार्थमितिव्याप्तिनिश्चयार्थंविषयपरिशो
धार्थंचेत्यर्थः॥कारणमाहअविज्ञाततत्त्वेर्थेइतिनविज्ञातंविशेषतोज्ञातंतत्त्वंवास्तवंरूपंयस्यत
स्मिन्नर्थेयऊहःसतर्कइतिभावः॥तथाचयत्रभूयोदर्शनादिनापिशंकापिशाचीनगच्छतितत्रोहःका
र्यइत्यन्वयासामान्यतोज्ञानंसंशयश्चतर्कहेतुरितिलभ्यं॥लक्षणंचास्यलक्षणवाक्येनलभ्यं॥व्याप्यारो
पत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयज्ञानत्वम्॥तर्कोयमीतिप्रतीतिसिद्धतर्कत्वंजातिर्वा॥स
चायंतर्कः पंचविधःआत्माश्रयान्योन्याश्रयचक्रकानवस्थेतरेतरव्याघातार्थप्रसंगभेदात्॥तत्रस्व ॥३१॥
स्यस्वापेक्षायामनिष्टप्रसंगआत्माश्रयः॥यथायद्घटंयंघटः॥एतद्घटजन्यःस्यात्॥एतद्घटानधिकर
णक्षणोत्तरवर्त्तीनस्यादितिस्वापेक्षापेक्षितत्वनिर्बंधनः॥स्वस्यानिष्टप्रसंगोऽन्योन्याश्रयःयथायद्घटं राम

घटएत द्घटजन्यजन्यःस्यात्एत द्घटभिन्नःस्यादिति।स्वापेक्षापेक्षितापेक्षितत्वनिबंधनश्चऋकंयथाघट
यंघटएत द्घटजन्यजन्यजन्यःस्यात्एत द्घटभिन्नःस्यादिति।आपत्तिप्रयोजकीभूतरूपवद्दाद्याद्यापाद
नमनवस्था॥यथाघटत्वंपदिघटजन्यत्वव्याप्यंस्यात्कपालसमवेतत्वव्याप्यंनस्यादिति॥एतच्चतु
ष्कान्यत्रसंगःपंचमः॥सोयंद्वेधा॥व्याप्तिथाहकोविषयपरिशोधकश्च॥तत्राद्योव्याप्तियहविरोधिव्य
भिचारशंकानिवर्त्तकःयथाधूमोयदिनक्रियभिवारीस्यात्वह्निजन्योनस्यादिति॥नचाद्यव्यतिरेक
निर्णयंविनाकथमेतद्ज्ञानंकीवतारइतिवाच्यं॥धूमोयदिवह्यसमवहितजन्यत्वेसतिवह्निसमवहि
तजन्योनस्यात्जन्योनस्यादित्याकारकतर्कात्धूमोवह्निसमवहितजन्योनवेत्याकारकाहार्यशंकानि
दृत्तावापाद्याभावहेतुकापादकाभावसाधकानुमानान्नथाविधापाद्यव्यतिरेकनिर्णयसंभवात्॥अत्र
तर्कस्याहार्यशंकानिवर्त्तकत्वमेव॥तर्कंकारणीभूतव्याप्तिज्ञानेनैवानाहार्यव्यभिचारशंकानिरासात्तन
थाहिवह्निजन्यत्वाभावोवह्निव्यभिचारित्वव्यापकइतिज्ञानेसतिवह्निजन्यत्वाभावाभाववानयमितिचा

पाद्यव्यतिरेकज्ञानेसतितथाविधानाहार्यशंकायाअसंभवात्॥वह्निव्यभिचारित्वंवह्निजन्यत्वाभावव्याप्य
मितिज्ञानसमयएववह्निव्यभिचारित्वाभावोवह्निजन्यत्वव्यापकइतिज्ञानंस[illegible]मोसंविद्येयतयावह्निज न
न्यत्वेवह्निव्यभिचारित्वाभावव्याप्यत्वज्ञानेचसत्ययंवह्निजन्यइतिज्ञानेचसतिव्यभिचारित्वाभावबु ॥३२॥
द्धिर्भवत्येवअतोनाऽनाहार्यव्यभिचारशंकासंभवतीतितर्कस्यकथंतन्निवर्तकत्वंस्यात्॥सचाहार्यव्य त
भिचारशंकानिवर्तकतमपितर्कस्यकथंआहार्यज्ञानस्याप्रतिबध्यत्वादप्रतिबंधरूपत्वाच्चेतिवाच्यं॥
अनिष्टापादकतर्केणापादकज्ञानेआद्यज्ञानरूपानिष्टसाधनताज्ञानोत्पादनद्वाराऽपादकज्ञानेद्वेषोत्पत्य
नावापादकज्ञानेइच्छाप्रतिबंधनेछाजन्याहार्यशंकोदयासंभवात्॥यथाप्रकृततर्कादेववह्निव्यभिचारि
त्वेवह्निजन्यत्वाभावभ्रमरूपानिष्टसाधनताज्ञानसंपादनेनद्वेषादिच्छानिवृत्तावितरसामग्रीकस्य ॥३२॥
व्यभिचारित्वज्ञानस्याहार्यस्यपुनःपुनर्जायमानस्यव्याप्तिग्रहप्रतिबंधकस्यनिरासःवस्तुतस्तर्कस्य
व्यभिचारशंकानिवर्तकत्वंव्याप्तिकारणीभूतोयोव्यभिचारशंकाविरहस्तत्संपादकत्वं॥इत्थंचव्याप्ति राम

चारशंकाद्यप्रतिबंधकतायांतर्कस्योत्तेजकतयोत्तेजकाभावविशिष्टव्यभिचारशंकाविरहसंपादकत्व
मक्षक्षममेवतर्कस्येतिबोध्यं॥परेतुतदापादककापत्तित्वेनाहार्योनाहार्यसाधारणतद्विशिष्टबुद्धि
त्वावच्छिन्नंप्रतिप्रतिबंधकतयातर्कस्यव्यभिचारशंकानिवर्तकत्वमित्याहुःद्वितीयस्तुःयदिनिर्व
ह्निःस्यान्निर्धूमःस्यादितिअयंचानुमितिविषयसाध्यशंकायांविपरीतकोटावनिष्टोपस्थापनेनतादृ
शशंकानिवर्तनद्वारोपयोगी॥ननुनैतत्संभवतिसाध्यव्याप्यवत्तापरामर्शेसतिसाध्यशंकायाएवा
संभवादितिचेन्न॥स्वरसवाहिन्यन्यादृताचेतिशंकाद्वैविध्योपगमात्॥आद्यायास्तत्रानुदयेविधू
मादृहिमानिवकुतश्चित्साधकाद्दृश्यभाववानितिबुद्धेर्बाधकाभावेनद्वितीयायाउत्पत्तेःसुलभत्वात्
अनुमितेश्चप्रतिबंधकत्वाच्च॥तर्केणनिर्वह्निज्ञानेधूमाभावभ्रमरूपानिष्टनिंद्यसाधनताज्ञानसंपा
दनेनद्वेषादिद्वारासाध्याभावसाधकप्रमाणजिज्ञासा[redacted]निरुत्यासाध्याभावसाधकज्ञाना
नुत्पादनद्वारातथाविधसंशयोनिरस्यतइतिसिद्धम्॥तर्कःशंकानिवर्तकइति॥नचापाद्यव्यतिरे

कनिश्चयस्यहेतुत्वेमानाभावः॥आपाद्येइष्टापत्तिवारकत्वेनतन्निश्चयहेतुताभावश्यकत्वात्एवंतर्क
प्रतिपक्षेआपाद्यव्याप्यापादकवत्तापरामर्शोपिहेतुर्बोध्यःयथानुमितौपक्षेसाध्यव्याप्यहेतुम
त्तापरामर्शोहेतुरन्वयव्यतिरेकात्॥पक्षेआपादकवत्तानिश्चयश्चाहार्यारोपरूपोबोध्यः॥ननुसंशय
स्याग्रहसंशयतयाव्याप्तिग्रहप्रतिबंधकत्वमेवनास्तिकुतःउक्तरीत्यातन्निरासद्वारातर्कस्यव्याप्तिग्र
होपयोगित्वमितिचेन्न॥अन्यत्रग्राह्यसंदेहस्याप्रतिबंधकत्वेपित्रुटेरन्वयव्यतिरेकाभ्यांतत्प्रतिबं
धकत्वाभ्युपगमात्॥तदुक्तम्॥यावद्व्याप्यतिरेकितंग्राह्यांशेनापिशंक्यते॥विपक्षस्यकुतस्तावद्धेतोर्ग
मनिकाचलमिति॥कारिकार्थस्तु॥हेतोरव्यतिरेकित्वंसत्वंविपक्षस्यविपक्षेयावदाशंक्यतेतावत्तस्यग
मनिकावलं॥गमकत्वंकुतइति॥व्याप्तिचाशंकाचक्वचिदुपाध्यधीनाज्ञेया॥तदुक्तं॥अन्येपरप्रयुक्तानांव्या ॥३३॥
प्तीनामुपजीवकाः॥तैर्दृष्टैर्नैवसाविष्टाव्यापकांशावधारणेति॥कारिकार्थस्तु॥अन्येयेकेचनहेतवः॥प
रप्रयुक्तानांव्याप्तीनामुपजीवकाः॥आश्रयासैर्हृष्टैरुपाधिमत्वेनसंदिग्धैस्तैर्हेतुर्निःसाध्यावधारणाः राम

नपक्षेसाध्यनिर्णयःअपितुहेतोव्याप्तिसंदेहइतिशेषःसचोक्तप्रमाणत्वातर्केणैवनिरस्यते॥अतएवपक्ष
मंतर्भावेऽपिविचारसंदेहसत्वेपिकार्यकारणभावादिप्रयुक्तानुकूलतर्कावतारेव्याप्तिग्रहोनविरुध्यतेइतिदिक्
॥७॥ ॥मूलं॥परस्परविरोधेहिनप्रकारांतरस्थितिः॥नैकतापिविरुद्धानामुक्तिमात्रविरोधतः॥८॥ ॥टी
का॥जीवसादृश्यादिरूपोपमानंतुनेश्वरेबाधकंतस्यपदविशेषशक्तियाहकत्वेनेश्वराभावासाधकत्वा
त्॥तत्रोपमानंसादृश्यंनत्वनरतिरिक्तमितिकेचनवदंतितन्मतंदूषयतिपरस्परविरोधेहीतिपरस्परविरो
धेभावत्वाभावत्वयोःपरस्परविरोधनियमेनप्रकारांतरस्थितिःसादृश्यंभावोऽन्यामतिरिक्तमितिनअति भावा
रिक्तसादृश्यस्यवक्ष्यमाणधर्मतद्व्यंजकत्वस्यचकल्पनेगौरवादितिकारिकापूर्वार्द्धार्थः॥तथापिसादृश्य
स्याभावाभावोभयात्मत्वेकिंबाधकंतत्राह॥नैकतापीति॥विरुद्धानांपरस्परविरुद्धभावत्वाभावत्वादिरूपे
विरुद्धधर्माणांनैकतापिएकधर्मिवृत्तितापिनेत्यर्थःनथाचसादृश्यस्याभावाभावोभयात्मकत्वेतादृग्वि
रोधभंगप्रसंगइतिभावः॥ननुभावत्वाभावत्वादीनांविरोधेकिंमानमतआह॥उक्तिमात्रविरोधतइतिउक्ति

मात्रस्वअयंभावइतिवाक्यजन्यबोधसामान्यस्यविरोधतः॥अयंनाभावइतिबोधात्तुतिबंधतस्तथाचभान
त्वाभावत्वयोरविरोधेतथानिषेधप्रतिबंध्यैकाभावानुपपत्तेस्तद्विषयकबुद्धिंप्रतितद्विरुद्धधर्मविषयक प्रतिबंधक
ज्ञानस्यप्रतिबंधकत्वनियमात्॥एवंचभावत्वाभावत्वयोर्विरोधआवश्यकइतिभावः॥ननुसादृश्यं ॥२५॥
नातिरिक्तंनवोभयात्मकंतदानस्यकांनभावइतिचेत्॥क्वचिद्भावाभावपदार्थमध्यइत्यवेहिसादृश्यंना
मतद्भिन्नत्वेसतितद्वृत्तिधर्मवत्वं॥यथागुरुखादिकंचंद्रभिन्नत्वेसतिचंद्रवृत्तिधर्मवत्॥स्वस्मिन्स्वसा
दृश्यवारणायसत्यंतं॥तच्चसादृश्यंभेदघटितमितिभेदप्रतियोगिज्ञानसहकृतेंद्रियेणगृह्यते॥क्वचि
दनुमानादिनेतिमंतव्यं॥ननुसादृश्यस्यभेदघटितत्वेगगनंगगनाकारंसागरःसागरोपमः॥रामरा
वणयोर्युद्धंरामरावणयोरिवेतिकथमितिचेन्न॥गगनवृत्तिधर्ममात्रस्यात्रविवक्षितत्वात्॥इत्थंचात्रस्ति ॥२५॥
तरवृत्तिधर्मवत्वनिषेधलाभान्निरुपमत्वंलभ्यतइत्यनन्वयोऽत्रालंकारइतिवदंति॥सत्वधर्मोयद्यभा राम
वस्तदासन्नमपदार्थरूपएव॥भावस्वरूपत्वेतुगुणेगुणिनिसमवायेवांतर्भावःतत्रगुणवत्वेद्रव्येगुणा

भाववत्येसमवायेनस्थितौगुणेतेनसंबंधेनाविद्यमानत्वेनुसमवायेयथाजातीनामित्याद्यन्यत्रविस्तरः॥८॥
॥मूलं॥साधर्म्यमिववैधर्म्यमानमेवंप्रसज्यते॥अर्थापत्तिरसौयुक्तमितिसाधारणंनकिं॥९॥ ॥टीका॥
यन्नुउपमानप्रमाणफलंगविगवयसादृश्यज्ञानमितितदपिप्रसंगादूषयति॥साधर्म्यमिवेति॥गव
येगोसादृश्यग्रहोन्नरंसागोर्गवयसदृशीतिज्ञानजनकत्वेनोपमानाख्यातिरिक्तप्रमाणांगीकारेसा
धर्म्यमिवगविगवयसादृश्यग्राहकोपमानाख्यप्रमाणमिववैधर्म्यग्राहकंमानं॥एवंप्रमाणंतिरंप्रस
ज्यतेप्रसक्तंभवतिअसौघटादौगोवैधर्म्यग्राहकंप्रमाणं॥अर्थापत्तिर्गविघटादिवैधर्म्ये घटेगोवैध
र्म्यंविनानुपपन्नमित्याकारंव्यतिरेकव्याप्तिज्ञानविधयाऽनुमानंयुक्तंयदितदासाधारणंनकिंगविगव
यसादृश्यज्ञानजनकमपिगवयेगोसादृश्यंविनागविगवयसादृश्यमनुपपन्नमित्याद्यनुपपत्तिज्ञानं
व्यतिरेकव्याप्तिज्ञानविधयाऽनुमानमेवकिंनस्यादितिसंपूर्णकारिकार्थः॥नचगवयनिष्ठगोसादृश्य
स्यपक्षधर्मतयाकथंतल्लिंगत्वमितिवाच्यं॥प्रतियोगितासंबंधस्यव्याप्यतासंबंधत्वाभ्युपगमे

नादोषादितिस्वयंबोध्यं॥तथाचोपदर्शितसादृश्यज्ञानस्यप्रकारांतरेणोपपादनेतज्ज्ञानकर्मेवोपमा
नंप्रमाणमितियत्नआदरणीयमितिभावः॥९॥ ॥मूलं॥संबंधस्यपरिच्छेदःसंज्ञायासंज्ञिनासह॥प्रत्य
क्षादेरसाध्यत्वादुपमानफलंविदुः॥१०॥ ॥टीका॥नन्वेवंसत्युपमानाख्यप्रमाणाभ्युपगमोव्यर्थस्त
त्राहसंबंधस्येति॥संज्ञायाः॥गवयादिनाम्नांसंज्ञिनागवयादिनासहसंबंधस्यज्ञानेः॥परिच्छेदो
ज्ञानंउपमानफलंविदुःउपमानाख्यातिरिक्तप्रमाणफलंविदुःगौतमाद्वयइतिशेषःतत्रहेतुःप्रत्य
क्षादेरसाध्यत्वात्प्रत्यक्षप्रमाणादिनाऽनुपपन्नमितिसंपूर्णकारिकार्थः॥अयंभावःविशिष्यांत ना
गवयपदवृत्तिकस्यकीदृशोगवपपदवाच्यइतिप्रश्नानंतरंप्रयोजकवृद्धेनगोसदृशोगवयपदवा
च्यइतिवाक्येप्रयुक्तेगोसदृशोगवयपदवाच्यइतिज्ञाह्यप्रमोत्तरंतज्जनितसंस्कारेणगोसादृश्य ॥३५॥
विशिष्टगवयात्मकपिंडज्ञानसहकृतेनजनिताकोसदृशोगवयपदवाच्यइतिस्मरणादुत्पन्नंगव
योगवयपदवाच्यइतिपदवृत्तिज्ञानंनप्रत्यक्षेणसंभवति॥गवयत्वविशिष्टादोसन्निकर्षादेरभावा राम

दितिलक्षनकृतयोपमानाख्यमतिरिक्तप्रमाणमवसेयमेष्टव्यमिति॥१०॥ ॥मूलं॥सादृश्यस्यानिमित्तत्वान्निमित्तस्याप्रतीतितः।समयोऽयंहः सर्वैर्गोशब्देनानुमनापिवा॥११॥ ॥टीका॥ननुपमानप्रमाणंविनापिगोसदृशोगवयपदवाच्यइत्यतिदेशवाक्यात्गवयोगवयपदवाच्योगोसदृशइत्यादिनानुमानाद्गवयपदप्रवृत्तिनिमित्तविशिष्टशक्तिग्रहसंभवादलंकिमुपमानाख्यातिरिक्तप्रमाणेनेत्यतआह॥सादृश्यस्येति॥गोरवेणगोसादृश्यस्यप्रवृत्तिनिमित्तत्वासंभवान्निमित्तस्याप्रतीतितःलाघवाद्गवयपदप्रवृत्तिनिमित्तत्वेनकृतस्यगवयत्वस्यानुपस्थितेःसर्वैर्गोसदृशपिंडदर्शनात्पूर्वंशब्देनउपस्थितातिदेशवाक्येनअनुभयापिवागवयपदवाच्योगोसदृशत्वादित्यनुमानेनवासमयोऽयंहःगवयपदप्रवृत्तिनिमित्तविशिष्टगवयपदशक्तिग्रहोऽशक्यइतिसंपूर्णकारिकार्थः।शक्तिबोधेपदजन्यपदार्थोपस्थितेरनुमितौपक्षतावच्छेदकविशिष्टपक्षज्ञानस्यहेतुतायाविनागवयत्वविशिष्टगवयोपस्थितिंतथाविधातिदेशवाक्यात्तथाविधानुमानाद्वागवयोगवयपदवाच्यइतिशक्तिग्रहासंभवेनतदुपपत्त्यर्थमतिरिक्तोपमा

नप्रमाणमवश्यमंगीकार्यमितिभावः॥१॥मूलं॥श्रुतान्वयादनाकांक्षंनवाक्यंलक्ष्यान्यदिच्छति॥पदार्थान्वयवैधुर्यात्तत्राक्षिप्तेनसंगतिः॥२॥ ॥टीका॥ननुप्रत्यक्षेणगवयत्वविशिष्टज्ञानानंतरमेवतथाविधातिदेशवाक्यात्

घटकीभूतयत्किंचित्पदलक्षणयोपस्थितेर्गवयत्वविशिष्टेतथाविधातिदेशवाक्यादेवतथाविधशक्तिग्रहसंभवेकिमुपमानेनेत्यतआह॥श्रुतान्वयादिति॥श्रुतान्वयात्॥उपस्थितातिदेशवाक्यघटकपदजन्यार्थान्वयबोधजननात्॥अनाकांक्षंवाक्यंजनितान्वयबोधत्वेननिराकांक्षमितिदेशवाक्यंनान्यदिच्छति॥नपश्चाद्गवयत्वविशिष्टेस्वघटकपदलक्षणयागोसादृश्योपलक्षितगवत्वविशिष्टविशेष्यकगवपदवाच्यत्वधियमुत्पादयितुंशक्नोतीतिकारिकापूर्वार्द्धार्थः॥तद्वाक्यजन्यज्ञानंहिधियंप्रतितद्वाक्यजन्यज्ञानबोधस्यातेजकाभावविशिष्टस्यप्रतिबंधकत्वादितिभावः॥ननुप्रथमतएवनथाविधातिदेशवाक्याद्गवयोगवयपदवाच्यइत्यन्वयबोधेकिंवाधकमित्यतआह॥पदार्थान्वयवैधुर्यमेकपदार्थेपरपदार्थान्वयानुपपत्तिर्यत्रतत्राक्षिप्तेनलक्षणीयेनसंगतिःज्ञानंबोधइत्यर्थः॥अयंभावः॥यत्रान्वयानुपपत्ति

स्त्रत्रैवलक्षणीयार्थस्यज्ञातृवोधोत्पत्तावप्रकृतेतदभावेनातिरेशब्दाकार्यकवयोगवपदवाच्यइत्याकारक
ज्ञातृवोधासंभवेनान्यथानुपपत्यागवयोगवपदवाच्यइत्याकारकविलक्षणंप्रमितिमुपेत्यतत्करणत्वेनातिरे
शादाकार्यज्ञानंगोसादृश्यविशिष्टपिंडदर्शनंतेनोपमानाख्यप्रमाणमतिरिक्तमवश्यमुपेयमित्याद्यत्रवि
स्तरः॥१२॥ ॥मूलं॥अनेकांतःपरिछेदेसंभवेवचननिश्चयः॥आकांक्षासत्तयाहेतुर्योग्यासन्निधिबंधना॥१३॥
॥टीका॥ननुभवतूपमानमतिरिक्तंप्रमाणंगृहीतस्वनुमानएवांतर्भवतीतिचेत्तथाहि॥गृहीतश्रवणानंतरं
जातपदार्थस्मरणः श्रोतानुमिनोति॥एतेपदार्थास्तात्पर्यविषयमिथः संसर्गवंतः॥आकांक्षायोग्यता
संन्निधिमत्पदस्मारितत्वात्॥गामभ्याजदंडेनेतिपदार्थवत्॥अत्रतात्पर्यविषयेतिकथनान्नानुमितत
संसर्गसिद्ध्यर्थंनरंएतानिपदानितात्पर्यविषयस्मारितपदार्थसंसर्गप्रमापूर्वकाणिआकांक्षादिमत्पद
त्वादंडवत्वात्॥संमतवत्तन्नद्वितीयानुमानेप्रमाणपूर्वकत्वसिद्धावपिकथं संसर्गसिद्धिरितिवाच्यं॥त
द्धिशेषणतयातस्यापिसाध्यकुक्षिनिक्षेपात्॥नन्वथाप्यनुमितेर्व्यापकत्वावछेदकप्रकारेणैवसाध्यप्रका

रकत्वनियमात्मारितपदार्थत्वेनैवरजतादिसिध्येत्तनुरजतत्वादिनाप्रमेयत्वादिनातादृशज्ञानस्याप्रवर्त्तक
तयारजतत्वादिप्रकारकज्ञानस्यैवप्रवर्त्तकत्वादितिचेन्न॥इदंरजतत्वादिनारजतादेरुपस्थितत्वादितरबाध
बलात्तेनरूपेणानुमितौभानसंभवात्॥अतएवसकर्तृकत्वानुमानेलाघवोपनीतमेकत्वादिकमपिभासतेल
घवज्ञानेतरबाधात्तिरिक्तस्थलएवचव्यापकतानवच्छेदकभानमभ्युपगमादितिवदंतीत्यतआह्अनेकांतइ
ति॥परिच्छेदे॥परिच्छेदविषयेएकपदार्थे॥परपदार्थनिरूपिततात्पर्यविषयसंसर्गत्वेवेसाध्येइतियावत्
अनेकांतःकरकाभिप्रायप्रयुक्तपयसांसिंचनीतिवाक्यघटकीभूततत्तीयार्थसेकक्रियाकरणत्वेव्यभिचारःत
त्रापरपदार्थकारकासंसर्गवत्वरूपसाध्याभावइतिशेषः॥ननुएकपदार्थेपरपदार्थसंसर्गवत्वंनसाध्यं
अपितुअपरपदार्थेतृत्यन्वयप्रयोजकधर्मावच्छिन्ननिरूपितसंसर्गवत्वंतत्रचनोपहितस्थलेव्यभिचारः ॥३७॥
सेकक्रियाकरणत्वान्वयप्रयोजकद्रव्यत्वावच्छिन्नसंसर्गसत्वात्तत्राह॥संभवेचेतिसंभवेत्तथाविधसंसर्गस्वरू
पयोग्यत्वेअपरपदार्थेतृत्यन्वयेप्रयोजकरूपधर्मावच्छिन्ननिरूपितसंसर्गवत्वेसाध्यइतियावत्॥निश्चयोन राम

एकपदार्थेऽपरपदार्थसंसर्गनिश्चयोनसंभवतीत्यर्थः॥तादृशनिश्चयस्यैवप्रकृतेउद्देश्यतयाउद्देश्यासिद्धेरितिभावः॥द्वितीयानुमानंदूषयति॥आकांक्षेतिसत्तयास्वरूपसत्तयाअज्ञाततयेतियावत्॥अभेदेतृतीया॥अज्ञाताकांक्षाग्राह्यप्रमाहेतुरित्यर्थः।अयंभावःपदानांपदांतरव्यतिरेकप्रयुक्तान्वयानुभावकत्वंपदार्थसंसर्गावगमप्रागभावोवाआकांक्षा।नैय्यायिकमतेस्वरूपसतीग्राह्यबोधहेतुरितियत्रनैय्यायिकनयेवाक्यात्पदार्थसंसर्गसिद्धिस्तत्रवेदांतिकनयेउपदर्शितानुमानात्पदार्थसंसर्गसिद्धिरनुपपन्नेवतत्राकांक्षाज्ञानाभावेनतद्घटितहेतुकानुमानासंभवादिति॥ननुतदतिरिक्तमेवलिंगमस्तुतत्राह॥योग्यासत्तिरिति॥आकांक्षाश्रुत्यायोग्यतासत्तिश्चाबंधनाबंधनंव्याप्तिस्तद्घटकत्वेत्यर्थः।राजपुत्रयोःसंसर्गप्रतीत्यप्रयुक्तेऽयमेतिपुत्रोराज्ञःपुरुषोपसार्यतामित्यादौराजपुरुषयोरासत्तियोग्यतासत्वेपितात्पर्यगर्भसाध्यासत्वाद्घटितहेतौतुनदोषःतात्पर्यगर्भपरस्परनिरूपिताकांक्षादिमत्वाभावेनैवाव्यभिचारादितिगूढाभिसंधिः॥एवंग्राह्यधियंप्रतिसंशयनिश्चयसाधारणयोग्यताज्ञान

स्येवहेतुतयायत्रयोग्यतासंशयस्तत्रोत्पन्नपदार्थसंसर्गबोधस्योपदर्शितानुमानान्ननिर्वाहःहेतुतावच्छेद
कांशेनिश्चयात्मकपरामर्शस्येवानुमितिहेतुत्वादितित्रतन्निर्वाहार्थंशाब्दप्रामाण्यमावश्यकं॥ननुयोग्य
तासंदेहस्यसाध्यसंदेहपर्यवसन्नतयासाध्यसंदेहस्यानुमित्यनुगुणतयापक्षताघटकसंशयान्तिरिक्तसंश
यान्यत्वमेवहेतुमतानिश्चयत्वमितिनानुपपत्तिरितिचेन्न॥गौरवात्॥साध्यव्याप्यसाधनवान्नवेतिसंशया
दनुमित्यापत्तेश्च।नचायमालोकोधूमावेत्युभयथापिवह्निव्याप्यइत्यत्रहेतुतावच्छेदकसंदेहेपिनेत्याद्यैके
रनुमितेरभ्युपगमाद्व्याप्यवत्तानिश्चयत्वेनैवानुमितिहेतुत्वंतस्यचयोग्यतारूपविशेषणसंदेहेपिसंभ
वान्नकाप्यनुपपत्तिरितिवाच्यं।व्याप्तिबुद्धिविरहाणामपिशाब्दान्वयानुभवदर्शनेनशाब्दस्यपृथक्प्र
माणत्वावश्यकत्वात्।नचव्याप्तिज्ञानशून्यकालीनःशाब्दप्रत्योऽन्यानुभवोनुमितिःतस्याव्याप्तिधीजन्यत्वा ॥३
त्तान्वियंव्याप्तिज्ञानाजन्याविलक्षणैवानुमितिःनचतत्रानुमितिसत्वेमानाभावःसमानेविषयेशाब्दसाम
ग्याबलवत्वात्अनुमितिंप्रतिशाब्दसामग्याःप्रतिबंधकत्वकल्पनेगौरवं॥मन्मतेतत्रशाब्दात्मकानुमिति रा०

स्वीकारेणतत्रतदप्रतिबंधत्वात्॥एवंभिन्नविषयेअनुमितिसामग्याःशाब्दसामग्याश्चप्रतिबंधकताद्वयक
ल्पनेगौरवंमन्मतेतुअनुमितिसामग्रीप्रतिबंधकतयैवोपपत्तिरितिचेन्न।अननुमितमसाक्षात्कृतंऋतमि
दंनैय्यायिकैरभ्युपगतादिकप्रामाणिकप्रत्ययेनानुमितित्वाद्यभावनिश्चयेननाद्दृतोविलक्षणप्रमित्यंतरस्वी
कारस्यावश्यकतयातत्करणस्यप्रमाणांतरमावश्यकमेवेत्याद्यग्रंथविस्तरः॥१३॥ ॥मूलं॥निर्णीतिन्नाके
वीक्याद्धिग्रामेवार्थस्यनिर्णये॥लिंगस्मृतिविलंबेननाद्दृस्याननुवादिता॥१५॥ ॥टीका॥लोकिकवाक्यश्रवे
णानंतरंश्रोतानुमिनोतिअयंवक्तावाक्यार्थंगोचरयथार्थज्ञानवान्आकांक्षादिमद्वाक्यत्वात्अहमि
वेतितथाचतेनानुमानेनज्ञानविशेषणतयासंसर्गासिद्धेःपश्चात्तत्यायकःशब्दोनुवादकःअनुवाद्यकत्वस्य
गृहीतग्राहित्वात्सानुभवमात्रजनकत्वरूपत्वात्स्वसमानाधिकरणस्वाव्यवहितपूर्ववर्त्तिस्वसमानाकारनिश्चयवि
षयविषयकतद्धिशेष्यकतत्प्रकारकानुभवमात्रजनकत्वरूपत्वादितियावत्।स्वपदमनुभवपरंवेदेतुव
कुरभावान्नतदनुमानेपूर्वमितिनानुवादकतेत्याहुंप्रामाण्यंअनधिगतार्थकानुभवकरणत्वस्यैवप्रामा

प्यरूपत्वात्॥तच्चग्रहीतग्राहीतरानुभवकरणत्वंस्वसमानाधिकरणत्वाव्यूर्ववर्तिस्वसमानाकारनिश्चयवि
षयविषयकेतरत्वद्विशेष्यकतत्प्रकारकानुभवकरणत्वमितियावत्॥स्वसमानाकारत्वंचस्वस्मिन्या
दृशीतद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारितातादृशतद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारितानिरूपि तत्वमितिप्रा
भाकरास्तत्राहनिरूपितेति॥निरूपितशब्दोवाक्यात्तूवेदस्थलेलक्षणायाआकांक्षाज्ञानादिघटितशब्दसाम
ग्रीतद्विशिष्टात्लौकिकवाक्यात्लिंगस्मृतिविलंबेनउपस्थितानुमानात्प्रागेवअर्थस्यनिर्णयेनवाक्यार्थे
स्यशब्दबोधसंभवेशब्दस्यअननुवादितानोपस्थितानुवादितेतिसंपूर्णकारिकार्थः॥सर्वत्रानुमिति
सामग्र्याअनियतत्वेनकुत्रिस्थलेलक्षणशब्दसामग्रीतरवशब्दबोधस्यानुभवसिद्ध
त्वात्तत्करणतयालौकिकस्यनिरुक्तप्रमाणत्वाक्षतितयातस्यापिप्रमाणत्वंनिर्व्यूढमितिप्राभाकरमत ॥३९॥
मनुपादेयमवेत्ति॥१५॥ ॥मूलं॥अस्तुदूषणान्यैःस्मारितत्वात्पदेरमी॥अनिताइतिनिरूपितेवेदस्यापिन
तत्कथं॥१५॥ ॥टीका॥ननुवेदनुत्यासामग्र्यवलोकेनुमानंविनानसंभवति।अनाप्तोक्तत्वशंकाव्युदासस्य राम

ज्ञाद्बोधांगत्वात्॥सचवेदश्चापौरुषेयत्वनिश्चयात्लोकेनुपौरुषेयेआप्तत्वावधारणात्आप्तस्यथार्थज्ञानवा
नितितदंतर्गतायावाक्यार्थसिद्धेरनुवादकोलौकिकदृन्यतआह॥व्यस्तपुंदूषणेति॥दोषवत्पुरुषाप्रणीतत्व
निर्णयेनाज्ञातानाप्तोक्तत्वसंदेहकैःपदैःस्मारितत्वात्॥अमीपदार्थाःअन्विताःपरस्परससर्गंवंइतिनिर्णीतेश्व
नुमितिसंभवेदस्यापितदनुवादकत्वंनकथमितिसंपूर्णकारिकार्थः॥अयंभावः॥उपदर्शितरीत्यालौकिकवाक्यज
न्यज्ञाद्बोधात्पूर्वमनुमानादिनासंसर्गेसिद्धिरावश्यकीतिलौकिकवाक्यमनुवादकंयदितदावैदिकवाक्येपिन
पुर्वारंभवतत्रापिज्ञाद्बोधप्रतिबंधकानाप्तोक्तत्वशंकाव्युदासार्थंदोषवत्पुरुषाप्रणीतत्वनिर्णयस्यावश्यकत
यादोषवत्पुरुषाप्रणीतपदस्मारितत्वहेतुनाएकपदार्थेअपरपदार्थसंसर्गानुमानस्यज्ञाद्बोधात्पूर्वंसंभ
वात्॥यदिज्ञाद्बोधेअनाप्तोक्तत्वसंदेहस्यआप्तसंदेहपर्यवसन्नस्याप्रतिबंधकत्वमितिवैदिकवाक्यजन्य
ज्ञाद्बोधात्पूर्वंतन्निवारकदोषवत्पुरुषाप्रणीतत्वनिर्णयस्यानावश्यकतयानोपदर्शितरीत्यावेदस्यानुव
दकत्वमित्युच्यतेतदालौकिकवाक्येपिननन्सर्वत्रलौकिकवाक्यजन्यज्ञाद्बोधात्पूर्वमुपदर्शितानुमानाना

वे

वस्यावश्यकत्वात्ग्राह्यबोधेऽनाप्तोक्तत्वसंदेहस्यायोग्यतासंशयवदप्रतिबंधकत्वेनतदुच्छेदकाप्तोक्तत्वनिर्णय
स्यापितदानपेक्षितत्वात्।अनेनयत्संशायव्यतिरेकनिश्चयोयत्रप्रतिबंधकोतन्निश्चयस्तत्रहेत्वनुमितोव्या
प्तिरितिनियमेनाप्तोक्तत्वनिश्चयस्यतद्धेतुत्वमितिनिरस्तं॥तत्संशायेपिवाक्यार्थबोधोत्पत्तात्संशाय
स्याप्रतिबंधकत्वात्॥अव्यभिचारसंशायव्यतिकरेनिश्चयप्रतिबध्येव्याप्तिज्ञानेव्यभिचारेणाप्रयोजक
त्वेनतादृशनियमाभावाच्च॥अपिचतत्कार्यतावच्छेदकंग्राह्यत्वंवालौकिकवाक्यजन्यग्राह्यत्ववालौकिकत्वे
नज्ञातवाक्यजन्यग्राह्यत्वंवा।नप्रथमः।वेदेतदभावात्।नद्वितीयःआप्तोक्तत्वनिश्चयेपिवेदानुकारेणप्रय
मानमन्वादिवाक्येपौरुषेयत्वाभिमानानांगौडमैथिलमीमांसकानांग्राह्यबोधादर्शनात्।नापित्र
तीयःलौकिकत्वेनाज्ञातलौकिकवाक्यस्यलेशतोग्राह्यसामान्यसामग्रीतएवलौकिकत्वेनज्ञातवाक्यादपि
ग्राह्योत्पत्तिसंभवेनतस्याकारणत्वादित्याद्यन्यत्रविस्तरः॥१५॥ ॥मूलं॥नप्रमाणमनाप्तोक्तिर्नादृष्टेकचि
दाप्तता॥अदृश्यदृष्टेःसर्वज्ञेनचनिःसागमऽक्षमः॥१६॥ ॥टीका॥ननूपदर्शितरीत्यायदिग्राह्यःप्रमा

॥४०॥

र्थंतर्हिकथंजगत्कर्तृपुरुषसिद्धिःसाक्षीवेताकेवलोनिर्गुणश्च।नकर्तृत्वंनकर्माणिलोकस्यसृजतिप्रभु
रित्यादित्यान्नाद्दृस्येवतत्रबाधकत्वात्।प्रकृतेःक्रियमाणानिगुणैःकर्माणिसर्वशः॥अहंकारविमूढ
त्माकर्ताहमितिमन्यतेइत्यादिनाचेतनस्यकर्तृत्वंभ्रांतियन्नामितिप्रतिपादनाच्चनचसर्वज्ञेईश्वरेविशेष
दर्शीतिभ्रमस्संभवति।तस्मादीश्वरज गत्कर्तृत्वंनास्तीतिनानुमानादिनाजगत्कर्तृत्वेनेश्वरसिद्धिरित्यत
आहनप्रमाणमिति।उपदर्शितवाक्यंयद्यनाप्रोक्तंतर्हितन्नप्रमाणं॥अनाप्रोक्तेरप्रमाणत्वात्।तथाचाप्र
माणत्वादेवनतद्बाधकम्॥यद्यप्याप्तोहिअदृष्टेर्थेअज्ञातेक्वचिदाप्ततानेतितदर्थेवरयथार्थज्ञान
वत्वंतद्धेतुराप्तस्यावश्यमेष्टव्यंतच्चज्ञानंतदर्थातींद्रियगोचरंनासर्वज्ञेसंभवतीत्येतदागमप्राप्यानु
रोधेनापिसर्वज्ञोभगवानायाति।नचतस्याकर्तृकत्वेएतादृग्वाक्यस्येवकर्तृकत्वायमानत्वाद्दृस्यनित्य
त्वानैवंसर्गप्रलयव्यवस्थापनेनाद्दृस्यानित्यत्वव्यवस्थापनादितिसंक्षेपःकारिकार्थः॥१६॥ ॥मूलं॥न
चासौक्वचिदेकांतःसत्वस्यापिप्रवेदनात्॥निरंजनावबोधार्थोनचसःनपितत्परः॥१७॥ ॥टीकानन्वेवं

सतिईश्वरेकर्तृत्वाद्यभावावेदकस्योक्तागमस्यकागतिरित्यतआह।नवासाविति।असौआगमः क्वचिदेकांतएवई
श्वरकर्तृत्वाद्यभावसाधकएवस्तीतिनसत्यापिप्रवेदनात्।अहंसर्वस्यप्रभवोमतःसर्वंप्रवर्ततइत्यादिनाकर्तृत्व
स्यापिप्रतिपादनादितिकारिकापूर्वार्द्धार्थः॥नन्वेवंसतिकर्तृत्वाभावावेदकस्यप्रामाण्यापत्तिरत्राहनिरंज
नेति।अजंनपदार्थोदृष्टादिकंनदेहावप्रतिपादनपरोननुसन्नपिकर्तृत्वाभावादिबोधकपदघटितोपितत्प
रःईश्वरेकर्तृत्वाभावप्रतिपादनतात्पर्यरहितोयार्द्धार्थःविरुद्धयोर्द्वयोर्मुख्यार्थत्वेनसंभवतीत्यकस्यामुख्या
र्थतायांनिषेधबोधकस्येवतत्कल्पनीयंसत्वबोधकस्यानुमानसंवादेनस्वार्थेस्थेर्यात्।एवंचनिरंजनत्वबोध
कश्रुतिसत्वेनसनिर्द्धर्मकः।कथंकर्तृतिनिरस्तकर्तृत्वबोधकप्राबल्येनानित्यविशेषगुणविरहबोधकत्वादि
तिभावः।निर्गुणत्वबोधकश्रुतीनांसंकुचितार्थत्वकल्पनातःकर्तृत्वाद्यवेदकानामोपाधिककर्तृत्वादिपरत्वमे ॥५१॥
वेतिनयुक्तं॥मानांतरेणाननुभूतस्यपदादुपस्थित्यसंभवाद्धर्मेणनिर्द्धर्मकंप्रमायितुमेवनशक्यइतिनि
र्द्धर्मकंवाक्यार्थएवनसंभवतीतिनयुक्तंप्रमेयत्वानित्यनुमेनप्रमेयत्वेनधर्मीभावविशिष्टस्याप्यनुभूतत्वात्॥ राम

अदृष्टविशेषस्यवप्रमयत्वाद्गउद्बोधकत्वाकल्पननकेवलधर्माभावाद्वाद्गष्टस्यस्मरणसंभवः।तदनुभवोऽन्याप्रकारकस्मृतिंप्रतितदंशेऽन्याप्रकारकत्वेनतुनानुभवस्यहेतुत्वंजातिमानित्यनुभवोनरंसघटइत्यादिविषयकपदशक्तिग्रहेतोरामरावणादिबोधेऽपिननुतत्रभवतिविशिष्टविषयकसंस्काराद्रामरावणत्वादिनास्मरणं।सत्यादिपदानिर्हेर्मेकस्यब्रह्मणोनिर्विकल्पकंस्मरणंतुकथंतद्विशेष्यकतत्प्रकारकस्मृतिंप्रतितद्विशेष्यकतत्प्रकारकसंस्कारस्यहेतुत्वात्जायमानंसप्रकारकमेवस्यान्ननुनिंप्रकारकमितिचेत्।तद्विषयकस्मृतिंप्रतितद्विषयकसंस्कारत्वेनापिसामान्यकार्यकारणभावकल्पनाद्विशेषणज्ञानंविनाजायमानंनिर्विकल्पकमेवजायते।अथवातत्रापिधर्माभावप्रकारकमेवस्मारणं।अधिकरणस्वरूपाभावनादिमतेअनेदंपिप्रकारविशेष्यभावभानाभ्युपगमात्॥निर्विकल्पकत्ववर्णनंतुतटस्थधर्माप्रकारकत्वापिप्रायकमित्याद्यन्यत्रविस्तरः॥९७॥ ॥मूलं॥हेत्वभावेफलाभावात्प्रमाणेसतिनप्रमा॥तदभावात्सहत्तिर्नैकर्मवादेप्यंयंविधिः॥९८॥ ॥टीका॥यागादौवेदंविनेवप्रवर्त्तेतिकिंवेदेनेतिप्रवर्त्तकवेदान्यथानुपपत्येवभगवदभाव

आर्थात्यर्थापत्तिरेवतद्बाधिकेत्यतआह। हेत्वभावेति। हेत्वभावे कारणाभावेफलाभावात्कार्याभावात्। प्रमाणेअ
सतियागादेरिष्टसाधनतावोधकवेदेअसतिनप्रमायागादाविष्टसाधनत्वादिप्रमानभवतितदभावात्।
यागादाविष्टसाधनत्वादिप्रमायाअभावात्प्रवृत्तिर्नेयागादौप्रवृत्तिर्नस्यादितिकारिकातृतीयपर्यंता
र्थः॥तस्मादिष्टसाधनत्वावेदकवेदस्यनेश्वरेणवैय्यर्थ्येनवावश्यकेचवेदेनेश्वरवैयर्थ्यंप्रवृत्तिकारणप्रमोत्प
त्तयेवेदस्यवेदत्वप्रामाण्यायनेश्वरस्यावश्यकत्वादितिभावः। ननुप्रवृत्तिंप्रतीष्टसाधनताज्ञानस्यहेतुत्वे
सिद्धेसर्वमिदंस्यात्ततदेवनेतिनत्वाहकर्मवादेप्यंयंविधिरिति॥येनेश्वरोनादिष्यतेकर्मभ्यएवजगज्जायत
इत्युच्यतेतन्मतेप्ययंकार्यकारणभावआवश्यकइत्यर्थः।अन्यथातन्मतेपिकर्मतरवप्रवृत्त्याख्यकार्योप
पत्तौतदावेदकवेदस्यनिष्प्रयोजनत्वंदुर्वारंस्यादिभावः॥१८॥ ॥मूलं॥अनियम्यस्यनायुक्तिर्नोनियंतोपपा ॥५२॥
दकः॥नमानयोर्विरोधोस्तिप्रसिद्धेबाध्यसोसमः॥१९॥ ॥टीका॥अर्थापत्तिश्चानुमान्नातिरिच्यतइत्यनु
मानबाधकनिराकरणेनैवतन्निराकरणमित्याह।अनियम्यस्येति। अत्रयतवृतिपदंअतइतिपदंचाध्या राम

हार्यं। यतः नियंता अव्यापकोनउपपादकः। नव्याप्यस्योपपादकः। अतअ नियम्यस्यअव्याप्यस्यनायुक्तिः ना
व्यापकंविनाऽनुपपत्तिर्भूमंविनावह्न्यनुपपत्तेरदर्शनात्वह्निंविनाधूमस्यानुपपत्तेर्दर्शनाच्चव्याप्यस्येवव्या
पकंचविनाऽनुपपत्तिरितिनियमात्॥ व्यतिरेकव्याप्तिरेवानुपपत्तिश्चार्थः। तथाचदेवदत्तोवहिःसन्नजीवि
त्वेसति। गृहासत्वात्योनवहिःसन्नसंनजीवित्वेसतिगृहासन्नपथामतोगृहस्थितोवेतिव्यतिरेकानुमाने
नैवज्योतिःशास्त्रावगतत्रातवर्षजीविनोवहिःसत्वज्ञानसंभवेव्यर्थेनदर्थेमर्थापत्याख्यातिरिक्तप्रमाणकल्प
नयेतिमंतव्यम्॥ नचान्वयव्याप्तिज्ञानस्येवानुमितिंप्रतिलाघवेनहेतुत्वाभ्युपगमाद्व्यतिरेकव्याप्तिज्ञानस्या
नुमित्यहेतुत्वेनवहि। सत्वज्ञानोपपत्यर्थमर्थापत्याख्यातिरिक्तंप्रमाणमवश्यमेष्टव्यंयथाजीवतोगृहा
सत्वंवहिःसत्वंविनानोपपद्यतितस्माद्वहिरस्तीत्यादिकमितिवाच्यम्॥ साध्यवदन्यावृत्तित्वादिरूपान्वय
व्याप्तिज्ञानस्यैवसाध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिज्ञानस्यापिविनिगमकाभा
वेनानुमितिंप्रतिहेतुत्वाभ्युपगमात्॥ नन्वन्नशरीरलाघवमेवविनिगमकमितिवाच्यम्। यतःशरीरला

घवेनानुमितिंप्रतिसाध्यवदव्यावृत्तिलरूपान्वयव्याप्तिज्ञानस्येवहेतुत्वंतदेवयदिव्यतिरेकव्याप्तिज्ञानस्य
स्वातंत्र्येणहेतुत्वंकल्प्यतेतदेवलघुनाभवतुपरंधूमव्यापकवह्न्यभाववान्स्यात्तदावह्न्यव्याप्तिविशिष्टहे
त्वभाववान्स्यादित्यापत्तिंप्रत्यापाद्यव्यतिरेकनिर्णयस्यहेतुत्वेकल्पनीयेकार्यतावच्छेदकोटावाधा
द्यव्यतिरेकनिर्णयस्याव्यवहितोत्तरत्वसंबंधेवैशिष्ट्यंनिवेश्यापत्तित्वमनिवेश्यानुमितिसाधारण
तथाविधनिर्णयविशिष्टत्वावच्छिन्नंप्रतितथाविधनिर्णयत्वेनहेतुतायामेवलाघवात्कृतेनेदृशहे
तुताकल्पनेनव्यतिरेकव्याप्तिज्ञानस्याप्यनुमितिप्रतिअनुमितिहेतुतानिर्वाहात्।तस्मात्शरीरगोरवे
णतत्रतन्नहेतुरित्यनादरणीयमेवेत्यास्तांविस्तरः॥अन्येतुक्वचिदस्तिगृहेनास्तीतिप्रमाणयोर्भावाभा
वविषयकत्वाद्विरोधोस्तिक्वचिदस्तीत्यस्याभावार्थत्वात्।गृहेनास्तीत्यस्याभावार्थत्वात्सर्वक्वचिदस्तीति
प्रमाणस्यगृहादितिरिक्तविषयकतयापरिहृतःएवंचाविरोधज्ञानंविषयभेदकल्पनयाविरोधज्ञानो
त्तरमर्थापत्त्यादिवदितिनमतंदूषयतिनमायोविरोधोस्तीति।भावाभावविषयकयोरुक्तमानयोर्भिन्नवि

षयकत्वसाधनान्नविरोधइत्यर्थःप्रमाणत्वेविरोधस्यविरोधेनप्रामाण्यस्येवाभावात्प्रमाणत्वंविरोध
श्चेत्कथमेकत्रोपलभ्यमानेभिन्नविषयकत्वंविनाअनुपपद्यमानंभिन्नविषयकत्वंसाधयतितथा
चायंप्रयोगःइमौभिन्नविषयकौप्रमाणत्वेसत्येकविषयकत्वार्थविरुद्धत्वादित्यदिचैवंसत्यप्यर्थो
पत्तिप्रमाणंतदाप्रसिद्धानुमानेष्वेवमस्तु।वह्निंविनाधूमस्यानुपपत्तेःसत्वात्धूमेनवह्निसिद्धेअनु
पलब्ध्यावह्न्यभावसिद्धौप्रमाणयोर्विरोधेनधूमेनवह्निसिद्धिः।परभागावछेदेनानुपलब्ध्याभावसि
द्धिरर्वाग्भागावछेदेनेतिविषयव्यवस्थापनस्यापिसंभवादितिभावः॥१९॥ ॥मूलं॥प्रतिपत्तेरपारो
क्ष्यादिंद्रियस्यानुपक्षयात्।अज्ञातकरणत्वाच्चभावावेशाच्चचेतसः॥२०॥ ॥टीका॥अनुपलब्धिर्नबाधिके
त्यत्रुमिदानींतस्याःप्रमाणत्वमपाकरोतिप्रतिपत्तेरिति।प्रतिपत्तेःअभावप्रतिपत्तेःअपारोक्ष्यात्।अ
परोक्षज्ञानत्वात्इंद्रियजन्यत्वंसाधनीयमितिशेषःतथाचाभावप्रतिपत्तिरिंद्रियजन्याअपरोक्षप्रति
पत्तित्वादित्यनुमानादभावप्रतिपत्तिरिंद्रियजन्यत्वसिद्धिसर्वत्रप्रत्यक्षप्रमाणवत्वादेवाभाववद्ग्रुपप

त्वनुपलब्ध्याख्यातिरिक्तप्रमाणाभ्युपगमोऽर्थइतिभावः॥ननुभावज्ञानकारणीभूताधिकरणाग्रहणेइं
द्रियमुपक्षीणंतत्राह।इंद्रियस्येतिवायोरूपाभावइत्यत्राधिकरणस्यातींद्रियतयातथाचक्रुमग्राह्यतयाऽ
अभावबुद्धेवनन्यथासिद्धत्वादितिभावः।इत्थंचोक्तानुमानेहेतोःस्वरूपासिद्धिरपिनास्तिइंद्रियव्यापार
न्वयव्यतिरेकानुविधायिनमानस्याअपरोक्षत्वसाधनादितिभावः।इतोपिनस्याअपरोक्षत्वमाह।अज्ञातक
रणत्वाच्चेति।अज्ञातकरणजन्यत्वादित्यर्थः।अभावप्रतिपत्तेरितिशेषः।अयंभावः।अभावबुद्धेवनुपलब्धि
र्नज्ञातकरणंअभावरूपत्वात्अनुपलब्धिज्ञानेतदनुपलब्धिज्ञानस्यतत्राप्येतदनुपलब्धिज्ञानस्यहेतुत्वेअभव
त्वनाच्चअपितज्ञातासानथातथाचाज्ञातासाधारणकरणजन्यत्वस्यप्रत्यक्षत्वव्याप्यतयातेनैवभावबुद्धेः।
प्रत्यक्षत्वात्मकापरोक्षत्वसिद्धिर्नैष्यत्यहेवेति।ननुज्ञातकरणजन्यत्वस्यप्रत्यक्षत्वव्याप्यत्वेमानाभावान्नतथे ॥५५॥
त्यतोऽभावावेशाच्चेतिचेतसोमनसः।भावावेशात्मानसभिन्नानुभवेभावभूतकरणसङ्करेतिनियमा
दित्यर्थः।तथाचमानसान्याभावानुभवः।मनोभिन्नभावात्मककरणजन्यःमानसान्यानुभवत्वादित्यनुमाना राम

न्नप्रमानोभिन्नभावात्मककरणजन्यत्वेन्वधारितेतत्रेतरबाधादिंद्रियजन्यत्वसिद्धा इंद्रियेणैवसर्वत्राभाववुद्धु
पपत्तावतिरिक्तानुपलब्ध्याख्यप्रमाणाभ्युपगमोव्यर्थः॥ननवनुपलब्ध्याख्यप्रमाणानभ्युपगमे घटाभाववा
तिघटभ्रमदशायांघटाभावसत्वादिंद्रियसंबंधविशेषणतयाघटाभावप्रत्यक्षापतिमन्मतेघटोपलंभसत्वे
नानुपलब्धेरभावान्नतत्प्रत्यक्षप्रसंगइत्यनायत्याप्रमाणांतरकल्पनमावश्यकमितिचेन्नचक्षुषाऽभावप्र
त्यक्षजननीयेप्रमाणांतरत्वेनाभिमतायायोग्यानुपलब्धेःसहकारित्वाभ्युपगमात्तदभावादेवघटाभा
ववतिघटाभावप्रत्यक्षवारणसंभवात्ननवेवंकिमवशिष्टमनुपलब्धेःप्रमाणांतरत्वेनप्रत्यक्षत्वेंद्रियस्यक
रणत्वेविशेषणतारूपप्रत्यासत्तिकल्पनमधिकमितिचेन्न॥विजातीयप्रमाकल्पनापेक्षयाप्रत्यासत्तेः स्वं
रकल्पनायाल्पीयस्त्वात्।व्यापारवत्वाभावेननस्याप्रमाणत्वासंभवाच्चननुव्यापाराभावेपिफलायोगव्य
वछिन्नकारणत्वरूपकरणत्वमुपपद्यतएव।अतःसाधकतमंकरणमितिसूत्रमपीतिचेन्न।फलायोगव्य
वछिन्नकारणत्वस्यव्यापारवदसाधारणकारणत्वापेक्षयागुरुत्वेनहेयत्वात्।तथाहिनिमीलनदशायां

मंधकारेऽचक्षुषोपिफलायोगात्त्वेतरयावत्कारणसमवधानेयदव्यवहितोत्तरक्षणेकार्योत्पत्तिस्तत्तेवफ
लायोगव्यवच्छिन्नतंवाच्यं।तस्यचयावत्कारणकार्यघटितत्वात्स्फुटंगुरुतंव्यापारवत्करणत्वापेक्षयेतिसु
धीभिर्विभावनीयमित्यास्तांविस्तरः॥२०॥ ॥मूलं॥प्रतियोगिनिसामर्थ्याद्व्यापाराव्यवधानतः॥अक्षाश्र
यत्वादोषाणामिंद्रियाणिविकल्पनात्॥२१॥ ॥टीका॥प्रकारांतरेणाभावज्ञानस्येंद्रियजन्यतंप्रसाध्या
नुपलब्धेःप्रमाणांतरत्वंनिराकरोति।प्रतियोगिनीति।अत्रइंद्रियाणीतिपक्षः।अभावग्राहकाणीतिपूर
णीयमूत्तत्रहेतुः।प्रतियोगिसामर्थ्यादिति।प्रतियोगिग्राहकत्वादित्यर्थः।तथाचानुमानादेरिवप्रतियोगि
ग्राहकस्येंद्रियस्याभावग्राहकत्वेबाधकाभावात्।यत्प्रतियोगिकाभावग्राहकंतदितरस्मा
न्व्यावृत्तश्चेंद्रियस्याभावग्राहकत्वेसिद्धेतुल्ययुक्तोऽभावज्ञानस्यापींद्रियजन्यत्वसिद्धिरविद्यादेवसर्वत्रा
भावप्रत्यक्षोपपत्तौव्यर्थमनुपलब्धेःप्रमाणांतरत्वमितिभावः।उक्तव्याप्तावुपमानेव्यभिचारवारणायोपमा
नमिन्नत्वंविशेषणंदत्तं।तेननकोपिदोषइतिवदंति।ननुग्राहकत्वंयदुजनकत्वंतज्ज्ञान्यथासिद्धिशून्यत्व

घटितंतच्चनास्तिइंद्रियस्याधिकरणज्ञानेनाभावधियंप्रत्यन्यथासिद्धस्तथाचकथमुपदर्शितानुमानात्सा
ध्यसिद्धिरित्तत्राहव्यापाराव्यवधानतइति।अधिकरणज्ञानस्यतत्रव्यापारत्वेनतत्रेंद्रियस्यान्यथासि
द्धत्वाभावदित्यर्थः।व्यापारेणव्यापारीनान्यथासिद्धइतिसिद्धांतादितिदोषः।उपदर्शितानुमानस्याप्रयो
जकत्वेप्रकारांतरेणाभावज्ञानेइंद्रियजन्यत्वंसाधयति।अक्षाश्रयत्वादिति।दोषाणांपित्तादिदोषाणांमिं
द्रियाश्रितत्वनियमादित्यर्थः।अयंभावः।अभाज्ञानस्येंद्रियाजन्यत्वेअभावभ्रमानुपपत्तिः।तज्जनकस्य
दोषवत्करणस्याभावात्दोषस्येंद्रियवृत्तित्वनियमेनानुपलब्धेतदसंभवादिति।तथाचदोषवत्करणज
न्यत्वान्यथानुपपत्त्याऽभावभ्रमस्येंद्रियजन्यत्वाभ्युपगमस्यावश्यकत्वेन्यत्रापितेनैवाभावबुद्ध्युपपत्ता
वनुपलब्धेःप्रमाणत्वाभ्युपगमोव्यर्थइति।ननुभ्रमंप्रतिदोषवत्करणंनहेतुरपितुदोषएवतस्मानो
क्तयुक्त्याऽभावबुद्धेरिंद्रियजन्यत्वसिद्धिरित्यतआह।विकल्पनादिति।अभावाधिकरणयोर्वेसिष्टा
वगाहिज्ञानस्यानुभवसिद्धस्यसत्वादित्यर्थः।अयंभावः।अभावबुद्धेरिंद्रियजन्यत्वानभ्युपगमेअभा

धिकरणयोर्विशिष्टबुध्यनुपपत्तिः॥ ॥परस्परजातिद्वयसांकर्यभियाऽत्रज्ञानेसाधारणप्रमाणद्वयजन्यत्वाभ्युपगमस्याशक्यतयाअनुपलब्धिप्रमाणजन्याभावबुद्धाविंद्रियेणाधिकरणभानासंभवादनुपलब्धेस्वभावमात्रग्राहकत्वेनतत्रप्रकारांतरस्यासंभवादित्यनुकूलतर्कसहकृतेनाभावबुद्धिरिंद्रियजन्याअधिकरणविषयत्वादित्यनुमानेनाभावबुद्धाविंद्रियजन्यत्वसिद्धाविंद्रियवत्तादेवसर्वत्राभावबुद्ध्युपपत्तौव्यर्थमनुपलब्धेःप्रमाणांतरत्वमितिहृदयायाततः।तथाहि।घ्राणेंद्रियजन्यसौरभज्ञानानंतरंसुरभिचंदनमित्युपनीतभानवदनुपलब्धिप्रमाणताभावज्ञानानंतरमभावाधिकरणयोरुपनीतभानरूपविशिष्टबुद्धिसंभवेनतदन्यथानुपपत्त्याऽभावधियइंद्रियजन्यत्वोपपादनमनुपलब्धेःप्रमाणत्वखंडनंचनयुक्तिसहंअतःपूर्वोक्तयुक्तिरेवन्याय्यसीतिसंक्षेपः॥२१॥ ॥मूलं॥अवच्छेदग्रहाभावाद्धीर्येसिद्धसाधनात्।प्राप्तांतरेनवस्थानान्नवेदन्योपिदुर्घटः॥२१॥ ॥टीका॥नत्वभावबुद्धिश्चेंद्रियजन्यातेदाकथमभावस्यनिर्विकल्पकावेद्यत्वसिद्धेतः।इंद्रियजन्यज्ञानविषयस्यनिर्विकल्पवेद्यत्वानियमात्कथं

॥४६॥

रम

क

वाइंद्रियेणाभावबुद्धिः॥तत्रेंद्रियप्रत्यासत्तेरभावादित्यतआरूअवच्छेदेति।अवच्छेदः।प्रतियोग्यादिः।
तद्ग्रहस्यप्रयोजनम्।अभावबुद्धेःसर्वभावश्यैवातेंअभावोननिर्विकल्पकविषयइतिशेषः।अयंभावः।
अभावबुद्धौप्रतियोगिज्ञानस्यहेतुत्वमवश्यमभ्युपेयंअन्यथानेतिप्रतियोग्यमिश्रिताभावप्रत्यक्षापत्तेः।
नवप्रतियोगिज्ञानंविनायिदृंतादृशंतेजःसामान्याभावात्मकांधकारप्रत्यक्षोदयेनव्यभिचारान्नेवमि
तिवाच्यंअभावत्वप्रकारकलौकिकप्रत्यक्षत्वावच्छिन्नंप्रतिप्रतियोगिज्ञानस्यहेतुत्वकल्पनेनानुपपत्यभा
वात्तथाचाभावोननिर्विकल्पकविषयः।पूर्वंप्रतियोभासकसामग्र्याआवश्यकत्वेनसर्वेन्नाभावप्रत्यक्षे
प्रतियोगिनःप्रकारविधयाभानसंभवात्प्रत्यक्षविषयस्यनिर्विकल्पकवेद्यत्वनियमेनाभावात्।ननुप्रति प्र।
योगिज्ञानस्यहेतुत्वंनयुक्तिसहंनचतथासतिनेतिप्रतियोग्यमिश्रिताभावप्रत्यक्षापत्तिः।इष्टापत्तिस्तु
सङ्ख्याभावोनिरूप्यत्वादितिसिद्धांतान्नसंभवतीतिवाच्यं।प्रतियोग्यमिश्रिभावप्रत्यक्षस्याप्रसिद्ध्याआ
पत्तेरसंभावात्॥नचप्रतियोगिज्ञानशून्यकाले।इंद्रियसंयुक्तविशेषणतारूपप्रत्यासत्तिबलाद्भावप्र

त्वस्तावच्छिन्नेआपाद्नीयफलतत्तथापत्तिः संभवतीतिवाच्यं। इंद्रियसंबद्धविशेषणताया: प्रतियोगि
मिश्रिताभावप्रत्यक्षंप्रत्येवहेतुनाया:कल्पनेतथापादनासंभवात्। नचेदिंद्रियसंबद्धविशेषणताया:
कार्यतावच्छेदककोटौप्रतियोगिविषयतानिवेशेप्रतियोगिभेदेनानंतकार्यकारणभावप्रसक्तिगौरवा
न्नदेषस्यज्ञानत्वेनप्रतियोगिज्ञानमेवस्वप्रकारीभूतधर्मावच्छिन्नप्रतियोगिताकत्वसंबंधेनप्रतियोगि
विषयतामनिवेश्यविषयतासंबंधेनाभावबुद्धौस्वातंत्र्येणकहेतुत्वकल्पनमेवोचितंतावतायंविशेषण
तयाप्रतियोगिविषयकस्यैवाभावप्रत्यक्षस्यसंभवात्अभावस्यनिर्विकल्पकावेद्यत्वसिद्धांतासंतरिति
चेन्नमास्मद्इंद्रियसंबद्धविशेषणताया:कार्यतावच्छेदककोटौप्रतियोगिविषयतानिवेशस्तथापिप्रतियो
गिज्ञानस्यहेतुत्वेमानाभाव:नचप्रतियोग्यमिश्रिताभावप्रत्यक्षापत्ति:।इष्टापत्तेः।तथासत्यभावस्यनिर्वि
कल्पकवेद्यत्वमभ्युपेयेतेत्यपिप्राँअघ्रोव्येसिद्धसाधनादिति।अघ्रोव्येअभावप्रत्यक्षेप्रतियोगिभाना
नैयत्येसिद्धसाधनात्।अभावनिर्विकल्पाकाभ्युपगमस्यावश्यकत्वात्अन्यथाऽनुपस्थितस्याप्रकारत्वात्।

अर्थवत्त्वप्रकारकप्रत्यक्षस्यानुपपत्तेः निरवच्छिन्नप्रकारताकबुद्धौ निरवच्छिन्नविषयताज्ञानस्य कारणत्वात्
अभावस्यापि निर्विकल्पकवेद्यत्वमुपेयते इति शेषः। तथाचाभावस्य निर्विकल्पकावेद्यत्वसिद्धांतो निर्युक्तिक
त्वादश्रद्धेय इति भावः। इंद्रियप्रत्यासत्तेरभावात्कथमभावप्रत्यक्षमिंद्रियेणस्यान्नत्राह प्राप्यंतरेऽनवस्था
दिति। अभावस्यस्वरूपं संबंधातिरिक्तसंबंधाभ्युपगमेनस्यतस्यापिसंबंधांतरस्वीकारेअनवस्थाप्रस
क्तेरित्यर्थः। तत्तत्कालिकत्वविशिष्टभूतलतादात्म्यादिस्वरूपस्यैवाभावसंबंधत्वमितिशेषः। तथाचस्वरूप
संबंधरूपविशेषणतायाएवतत्रप्रत्यात्पत्तित्वसंभवान्नकाप्यनुपपत्तिरितिभावः। अभावनिर्विकल्प
काभ्युपगमः स्वरूपस्याभावसंबंधत्वाभ्युपगमश्चानुपलब्धेः प्रमाणांतरत्वाभ्युपगंतृणामप्यावश्य
कइत्याहनचेत्यादि। अभावनिर्विकल्पकानभ्युपगमेस्वरूपस्यसंबंधत्वानभ्युपगमेचाभावस्यानुपालब्धि
वेद्यत्वनियमोपिदुर्घटइत्यर्थः। नहिविशेषणविशेष्याभ्यांनिर्विकल्पकसंबंधंविनाचाभावाधिकरण
योर्विशिष्टबुद्धिर्घटतेइतिभावः॥२७॥ ॥मूलं॥ प्रत्यक्षादि[illegible]रेभिरेवमधरोदूरेविरोधोदयः प्रायोयन्मु

स्वयंक्षणेकविधुरेरात्मापिनासाद्यते॥तंसर्वानुविधेयमेकमसमस्वछंदलीलोत्सवंदेवानामपिदेवमुद्भवदति
श्रद्धाःप्रपद्यामहे॥२५॥ ॥इतिकुसुमांजलिकायांतृतीयस्तबकसमाप्तः॥३॥ ॥टीका॥ईश्वरस्तुतिव्या
तेनस्तवकार्थमुपसंहरति॥प्रत्यक्षादिभिरिति।अत्रयतः पदंअतः पदंचपूरणीयम्।तथाचयतः एभिरी
श्वरेकर्तृत्वाद्यभावसाधकत्वेनाभिमतैःप्रत्यक्षादिभिरपिप्रमाणैर्यन्मुखवीक्षणेकविधुरेर्यस्येश्वरस्यस्व
खवीक्षणेनज्ञानसापेक्षत्वेनएकविधैरेधर्मिग्राहकमानबाधितैरात्मास्वभावः। प्रामाण्यंनासाद्यतेअतः
विरोधादयोऽधरोअप्रमाणरूपाविरोधादयस्यवर्ण्यःईश्वरोदिकर्तास्यात्शरीरीस्यादित्यादिरूपोदूरेस
र्वैःअनुविधेयावश्यायस्यएतादृशंएकंसजातीयद्वितीयरहितंअसमस्वछंदलीलोत्सवंअसमानिरु
पमायास्वछंदलीलाचेतनांतराप्रयोज्यक्रीडाउत्सवोदुरवाजमनंकर्मयस्यतादृशंदेवानामपिदेवंसर्वे ॥५८॥
श्वरंभद्रवदतिश्रद्धाःभक्त्यश्रद्धाविशिष्टावयंप्रपद्यामहेनमस्कुर्मइतिसंग्रहश्लोकार्थः॥२५॥ ॥
इतिश्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीनारायणतीर्थकृतायांकुसुमांजलिव्याख्यायांतृतीयस्तबक राम

व्याख्यासमाम्नाः॥३॥ ॥मूलं॥अव्याप्तेरधिकव्याप्तेरलक्षणंपूर्वदृक्। यथार्थानुभवोमानमप्रेक्ष्यतयेष्यते॥४॥ ॥टीका॥ननूपदर्शितरीत्यावेदादिकर्तृत्वेनेश्वरसिद्धावपितस्यप्रमात्मकत्वमसिद्धं।अगृहीतग्राहित्वात्मकप्रमात्वमन्यथानिर्वक्ति।अव्याप्तेरिति।अपूर्वदृक्।अगृहीतग्राहिज्ञानंधर्मपरनिर्देशेनतादृशज्ञानत्वेनप्रमालक्षणंधारावाहिकप्रमायामव्याप्तेःभ्रमेऽतिव्याप्तेश्चेत्यर्थः।ननुभ्रमवारणाययथार्थेतिदेयंअथवातन्मतेऽन्यथाख्यातेरनभ्युपगमात्।अनधिगतपदेनैवतद्वारणात्।यथार्थेतिनदेयं।एवंनाव्याप्तिरपिद्वितीयादिज्ञानानामलक्ष्यत्वात्।नचयथार्थप्रवृत्त्यादिरूपकार्यजनकत्वंतत्रापिसत्वात्तेषामप्रमात्वेवीजाभावइतिवाच्यं।यथार्थप्रवृत्तिजनकत्वरूपंयथार्थ्यंनहितत्रकारकत्वंप्रमालक्षणप्रविष्टयाथार्थ्यमनधिगतार्थविषयकत्वमेवेतिविशेषात्।नचतर्हिज्ञानार्थविषयकज्ञानजनकानांचक्षुरादीनांमप्रमाणत्वापत्तिः।अधिगतार्थविषयकज्ञानाजनकत्वरूपाप्रमाणत्वस्येष्टत्वात्तथाहि।अनधिगतत्वंयदाकदाचिद्वासर्वकालेवा।नाद्यः स्मृतेरपिप्रमात्वापत्तेःनांत्यः।प्रथमज्ञानस्य।

१ स्मृतिवारणायानधिगतेति दृक्षाकारणायज्ञानमितिचेन्न अनधिगतेत्यादिदुर्वचस्येत्यर्थात् १

भ्रमात्वप्रसंगात्। तद्विषयस्याप्यज्ञायमानत्वात्। नवस्वोत्पत्तेः। पूर्वमनधिगतत्वं द्वितीयादिज्ञानानांयथा
र्थत्वेपियारिभाषिकप्रमात्वाभावस्येष्टत्वादितिवाच्यं। द्वितीयादिज्ञानकरणानांसर्वसिद्धप्रमाकरणत्वा
भावप्रसंगात्। किंचप्रथमज्ञानस्याप्रमात्वाभावप्रसंगः। तद्विषयस्यापिउरुषांतरेणज्ञातत्वात्। न
चतत्पुरुषेणपूर्वमज्ञातत्वंविवक्षितंतथापिप्राथमिकघटत्वादिज्ञानानामप्यप्रमात्वप्रसंगात्। तद्विष
याणामपिजन्मांतरज्ञानत्वात्। एतज्जन्मनितत्पुरुषेणपूर्वमज्ञातत्वमित्यपिनवालस्यस्तन्यपानेष्वस्मृतावति
व्याप्तेः। स्वसमानाधिकरणस्वाव्यवहितपूर्ववर्त्तिस्वसमानाकारज्ञानाविषयविषयकत्वरूपानाधि
गतार्थेयाहित्वात्मकप्रमात्वस्यनिष्कृष्टस्यतत्रापिवाधादितिस्वयंवोध्यं। यत्तुधारावाहिकद्वितीयादिज्ञाना
नांपूर्वज्ञानाविषयत्वेनविषयत्वान्नतत्राव्याप्तिरितितन्नसम्यक्सूक्ष्मेणानांनीरूपतयाप्रत्यक्षेणाविषयी ॥४९॥
करणादितिसंक्षेपः। ननुभवन्मतेकथंस्मृतिव्याप्तितत्राहयथार्थानुभवोमानमिति। अत्रमानशब्दोभावव्यु
त्पत्तिपरः। तद्द्विरोध्यकृत्वाविच्छिन्नायातत्प्रकारतोज्ञानंयोनिश्चयरूपोऽनुभवस्तत्त्वमित्यर्थः। अत्र

तत्र तयोः शुक्तिरजतेइतिसमूहालंबनस्यापिरजतत्वप्रमात्वापत्तिवारणायविशेष्यता प्रकारतयोरवच्छेद
वच्छेदकभावनिवेशः।भ्रमासाधारण्यायतद्धिशेष्यकत्वनिवेशः।रजतेद्रव्य त्वप्रकारकज्ञानस्यापिरज
तत्वप्रमात्वापत्तिवारणायतत्प्रकारकत्वनिवेशः।रजतेरजतंनवेतिसंशयवारणायनिश्चयेतिस्मृतिवारण
यानुभवइति।स्मृतिभिन्नज्ञानस्यानुभवत्वात्।स्मृतिस्तुसंस्कारमात्रजन्यंज्ञानं।मात्रपदेनबहिरिंद्रियव्या
वृत्तिः।तेननप्रत्यभिज्ञायामतिव्याप्तिः।मानसज्ञानवारणायसंस्कारजन्येति।ननुयथार्थज्ञानमेवप्रमालक्ष
णमस्तु।किमितिस्मृतिव्यावृत्तिः।नचप्रमात्वस्यस्मृतिसाधारण्यात्वेस्मृतिरूपप्रमाकरणतयाऽनुभवस्य
प्रमाणत्वापत्तिः।इष्टत्वात्।अनुमित्युपमितिशाब्दभिन्नप्रमितिकरणत्वेनविभजनान्निर्विभागव्याघातोपी
त्यतआनपेक्ष्यतयेष्यतइतिइतरप्रामाण्यानधीनप्रामाणिकतयाऽनुभवस्यप्रमात्वमितिप्रमात्वमनुभवघ
टितमित्यर्थःस्मृतेःप्रमात्वंहिअनुभवप्रमात्वाधीनमितिस्मृतेरप्रमात्वमितिभावंअन्यथाऽनुभवस्यप्रमाणां
तरत्वापत्तेरुक्तत्वात्।अदसाधारण्यंसरूकार्योसाद्यमनोवहिर्गोचरंप्रमांजनयतितस्यैवप्रामाण्यंतदत्व

नियमात्। नचानुभवस्य प्रमाणांतरत्वं युक्तं। तांत्रिकाणांतत्र प्रमाण व्यवहाराभावात्। उक्तरूपेणविभजनंवा
युक्तंविनिगमनाविरहतः। प्रत्यक्षंनिवेश्यानुमितिमनिवेश्यप्रत्यक्षापमितिज्ञानाद्भिन्नप्रमितिकरणत्वेनानु
भवस्यानुमानेप्यंतर्भावापत्तेः। तस्मात्स्मृतिव्यावृत्तमनुभवघटितमेवप्रमालक्षणंवाच्यमित्यास्तांविस्तरः॥१॥
ननुघटज्ञानेनघटोपादानकज्ञातताख्यातिरिक्तपदार्थोजन्यतइत्यवश्यमुपेयं। अन्यथाज्ञानेतदीयत्वनिय
मानुपपत्तेः। तथाविधातिरिक्तपदार्थस्युपगमेतुननदनुपपत्तिः। यत्रयज्ज्ञानबलात्तादृशोपकारस्तज्ज्ञानतदीय
मित्यभ्युपगमात्। तथाचपूर्वपूर्वज्ञानोत्पादितज्ञाततामादायउत्तरोत्तरज्ञानानामगृहीतग्राहिकत्वान्नप्रमा
लक्षणाव्याप्तिरित्यतोज्ञाततातिरिक्तपदार्थंदूषयतिस्वभावनियमेति। स्वभावनियमाभावात्कारणविशेषस्य
कार्यविशेषजननस्वभावानियमानभ्युपगमात्। उपकारोपिज्ञाततारूपातिरिक्तपदार्थोपिदुर्घटः। तेनज्ञानेनत ॥५०॥
त्रैवोपकारेजन्यतेनान्यत्रकुतइतिप्रश्नस्यतन्मतेपिदुःसमाधेयत्वात्। यदिस्वस्वभाववत्त्वेनेतिभावोपिप्रेतंतदास्व
भावसंबंधेनैवज्ञानंतदीयंनान्यविषयकमितिनियमसंभवात्किंज्ञाततयेतिभवतुवासतिज्ञाताताससमवायिका राम

रणस्यसत्वात्। नाविद्यमानेतथाचतदीयतानियायकस्वभावएवेत्यन्यत्रापिसएवास्त्विति भावः॥२॥ ॥मूलं॥स्व
भावनियमाभावादुपकारोऽपिदुर्घटः॥ सुघटत्वेपिसत्यर्थेसतिकागतिरन्यथा॥३॥ ॥अनेकांतादसिद्धेर्वानव
लिंगमिहक्रियात॥ द्वैशिष्ट्यप्रकाशात्वान्नाध्यक्षानुभवोधिके॥३॥ ॥टीका॥ननुज्ञानंकर्मणिकिंचिज्जनकंक्रि
या वान्नवेमनक्रियावदित्याद्यनुमानान्नज्ञातेविषविषयेउपकारेसिद्धेपरिशेषा[illegible]ततारूपातिरिक्तपदार्थसि द्धि
रित्यतआह॥अनेकांतादिति यदिक्रियावंधात्वर्थत्वंतदाघटमिच्छतीत्यादाविच्छारूपधात्वर्थव्यभिचारात्तद्व
द्धयाघटाद्यात्मककर्मणिकिंचिज्जननात्यदिकर्मत्वंतदाज्ञानरूपस्येहत्वसिद्धेःज्ञानस्यग्रहणत्वात्तद्ग्रह
उपकारसाधनेक्रियानलिंगमितितादात्म्येनहेतुत्वाप्तिप्रायेण क्रियावंनहेतुरित्यर्थः॥ननुतथापिज्ञातोघट
इतिप्रत्यक्षेणज्ञानंतसिद्धेर्नैप्रत्यक्षहेवेत्यतआह॥नद्वैशिष्ट्येति॥तद्वैशिष्ट्यप्रकाशात्तद्ज्ञासंबंधविषयकत्वा
त्तध्यक्षानुभवोज्ञातोघटइतिनोयः॥नाधिकेन विषयतारूपज्ञानसंबंधातिरिक्तज्ञातताविषयकइत्यर्थः।
धविनष्टघटेपिज्ञातोघटइतिप्रतीतेस्तत्रयज्ञातताया घटंविनाज्ञानेनाप्यसंभवेनस्वरूपसंबंधरूपविषयता

पाएवविषयत्वस्यावश्यवाच्यत्वाच्चविद्यमानघटादावपिसेवविषयोस्कृकृतमधिकेनस्वरूपसंबंधरूपविष
यतारिरूपज्ञानतारूपविषयत्वीकारेणेतिभावः।नचज्ञानस्यचक्षुरयोग्यतयाज्ञातोघटइतिचाक्षुषेज्ञा
नभानासंभवेनान्यथानुपपत्यातत्रज्ञानतात्मसिद्धिरितिवाच्यं।ज्ञानस्यचक्षुरयोग्यत्वेपिज्ञानांत्रोउपनीत
भानात्मकतथाविधचाक्षुषसंभवात्।नचज्ञानस्यातींद्रियतयाप्रत्यक्षासंभवेनतन्मूलकानुमानादेरप्य
सिध्याउपनायकज्ञानाभावेनतथाविधोपनीतभानमप्यसिद्धमितिवाच्यं।मनःसंयुक्तसमवायसन्नि
र्षादिघटितसामग्रीवलात्तज्ञानप्रत्यक्षेबाधकाभावेनज्ञानस्यातींद्रियत्वासिद्धेः।नचैवंसतिनिर्विकल्पक
स्यापिप्रत्यक्षापत्तिरितिवाच्यमूतद्धर्मावछिन्नविशेष्यकत्वप्रकारतानिरूपितत्वप्रकारकत्वनिष्ठप्रकार
तानिरूपितविशेष्यतासंबंधेनज्ञानप्रत्यक्षंप्रतितादात्म्येनतद्धर्मावछिन्नविशेष्यतानिरूपिततन्निष्ठप्र ॥५९॥
कारताग्रहिज्ञानत्वेनहेतुताकल्पनस्यघटोभूतलंचेतिसमूहालंबनानंतरंघटत्वेनभूतलंज्ञानामीत्यनुव्यव
सापवारणायावश्यकृतयाज्ञानस्यप्रत्यक्षत्वेपिनिर्विकल्पप्रत्यक्षवारणसंभवात्।अतएवनिर्विकल्पक राम

प्रत्यक्षवारणार्थं विषयतासंबंधेनप्रत्यक्षंप्रतितादात्म्येननिष्प्रकारकज्ञानत्वरूपनिर्विकल्पकत्वेनप्रतिबंध
कत्वकल्पनेगौरवान्नद्रपेक्ष्यज्ञानत्वेनैवप्रतिबंधकत्वंकल्प्यमितिज्ञानसामान्यमेवान्तोद्रियमितिभ्रमत
मपास्तम्।उपदर्शितकार्यकारणभावेनावश्यकल्पनीयेननिर्वाहेतथाविधप्रतिबध्यप्रतिबंधकभावस्या
कल्पनीयत्वादिति।ननुघटंजानातीत्यादौक्रियाजन्यफलशालित्वरूपमुख्यकर्मत्वोपपत्यर्थंज्ञा।नताभु
पगमआवश्यकइतिचेन्ना।घटमिच्छतिघटंकरोतीत्यादा।विवनष्टघटस्थलइवविषयत्वरूपभाक्कर्मत्वं
नैवद्वितीयाविभक्तिर्निर्वाहेज्ञानताख्यातिरिक्तपदार्थानावश्यकत्वात्।तथाचकर्मणिद्वितीयेतिसूत्रस्य
कर्मपदस्यघटपदोत्तरद्वितीयोपपत्यर्थंगौणमुख्यसाधारणकर्मत्वविशिष्टपरत्वमेवेष्टव्यमित्यास्तांवि
स्तरः।ननुज्ञातोघटइत्यत्रनज्ञानजन्यज्ञाततारूपाविषयताविषयः।किंनुस्वरूपसंबंधरूपाविषयतैव
घटज्ञानयोः।संबंधरूपाविषयइत्यसंगतं।विषयतायाः।स्वरूपसंबंधत्वमतेतस्याः।ज्ञानस्वरूपत्वंवि
षयस्वरूपत्वंवा।नतावदाद्यः।ज्ञानस्वरूपत्वेघटभूतलवृत्तिविषयतयोरेकेनघटभूतलमितिज्ञानोत्तरं

घटनिष्ठप्रकारतानिरूपितभूतलनिष्ठविशेष्यतानिरूपितज्ञानवानहमित्याद्यनुव्यवसायवद्भूतलनिष्ठप्रकारतानिरूपितघटनिष्ठविशेष्यतानिरूपितज्ञानवानहमित्यनुव्यवसायापत्तेर्घटपटादितिसमूहालंबनस्यभ्रमत्वापत्तेश्च। तज्ज्ञानस्यैकेनतत्स्वरूपघटपटादिविषयतायाऽप्यभेदेनघटत्वाभाववन्निष्ठविशेष्यतानिरूपितघटत्वनिष्ठप्रकारतानिरूपितज्ञान[illegible]त्वरूपभ्रमत्वस्यतत्रसत्वात्॥न द्वितीयः घटभूतलसंयोगः। घटवद्भूतलमितिसमूहालंबनविशिष्टबुद्धेर्विषयानामेकेनविषयकृतवैलक्षण्याभावाद्विषयताकृतमेववैलक्षण्यंवाच्यं। तत्रत्वविषयतायाविषयरूपत्वेतत्स्वरूपाणांतासामपिवैलक्षण्याभावात्समूहालंबनविशिष्टबुद्धेर्वैलक्षण्यानुपपत्तिर्जागरूकैवानत्वसमूहालंबनाविषयस्यघटप्रतियोगिकभूतलानुयोगिकत्वरूपसंबंधसंबंधस्यापिविशिष्टबुद्धिविषयत्वान्नवैलक्षण्यानुपपत्तिरितिवाच्यं। ॥५२॥

घटभूतलसंयोगप्रतियोगित्वानुयोगि[illegible]त्वानीतिसंबंधसंबंधविषयकस्यापिसमूहालंबनस्यसंभवात्। नचसमूहालंबनेसंयोगत्वेनसंयोगभानान्नानुपपत्तिरितिवाच्यं। घटवद्भूतलं[illegible]संयोगश्चेतिवि

शिष्टज्ञानस्यतादृशसम्बन्धालंबनाद्वैलक्षण्यानुपपत्तेरितितस्याःस्वरूपसंबंधत्वंदुर्वचं।अतिरिक्तत्वाभ्युप
गमेतुकिमपराद्धंज्ञाततयेतिचेन्न।अतिरिक्तत्वेपिज्ञानजन्यत्वानभ्युपगमेनज्ञानताभेदोपपत्तेरित्याद्य
न्यत्रविस्तरः।ननुविषयतायाःस्वरूपसंबंधत्वेअतिरिक्तत्वेनाविषयभेदेनभिन्नायाःकथमनुगतप्रती।ति
रितिचेन्न।विषयतात्वमेकमंगीकृत्यैवहिअतोघटत्वविशिष्टबुद्धिंप्रतिघटत्वविषयकज्ञानत्वेनहेतु
तायांविषयतायाः।प्रकारताविशेष्यतादिभेदेनभिन्नतयाएकस्यानिवेशोऽन्यविधविषयताशा
लिज्ञानाद्विशिष्टबुद्ध्यनुत्पत्त्यापत्तिरपिनिरस्तातत्रविषयतात्वेनप्रकारताविशेष्यतयोरनुगमेना
नुपपत्त्यभावादित्यास्तांविस्तरः।साचविषयतात्रिविधाविशेष्यताप्रकारतासांसर्गिकीचेतिभेदात्।
यथाघटोयमित्यत्रघटत्वेप्रकारताघटेविशेष्यता।संबंधेसमवायादौचसांसर्गिकीज्ञाननिरूप्ये
त्यादिकंस्वयंबोध्यम्।भासमानवैशिष्ट्यप्रतियोगित्वंप्रकारत्वंभासमानवैशिष्ट्यानुयोगित्वंविशे
ष्यत्वमितितुसंप्रदायः।अत्रविशेषोऽन्यत्रावसेयः॥३॥ ॥मूलं।अर्थेनैवविशेषोहिनिराकारतयाधि

यां। क्रियया इव विशेषो हि व्यवहारेषु कर्मणां ॥७॥ ॥टीका॥ ननु घटज्ञानादीनां घटपटादिविषयक ज्ञानाद्येस्
याभेदसिद्ध्यर्थानुपपत्या घटज्ञानादिजन्यज्ञातताभ्युपगमआवश्यकस्तत्राह। अर्थेनैवेति। अत्र प्र
थमोहि शब्दोयतइत्यर्थेद्वितीयोहि शब्दः अतइत्यर्थेअर्थेणेत्यत्रततीया। अभेदेलाक्षणिकोविशे
षश्चाद्यार्थइतरभेदानुमापकःतथाचयतोनिराकारतयाज्ञानानामर्थाभिन्नइतरभेदानुमापकः। अतः
कर्मणांघटपटादीनांव्यवहारेषुविशिष्टबुद्ध्यादिषुक्रिययैवघटपटादिरूपरवंकार्याभिन्नइतर
भेदानुमायकइतिसंपूर्णेकारिकार्थः विषयभेदाद्धिविषयिताविशेषभेदाद्धाज्ञानभेदोनज्ञाततयेतिभा
वः॥७॥ ॥मूलं॥ मितिःसम्यक्परिच्छित्तिस्तद्वत्ताचप्रमातृता। तद्योगश्चबलेदःप्रामाण्यंगोतमेमते
॥८॥ ॥टीका॥ ननूपदर्शितयुक्त्याईश्वरज्ञानस्यप्रमात्वेपिईश्वरेप्रमातृत्वप्रामाण्यमनुपपन्नं। ईश्व ॥५३॥
रप्रमायानित्यतयातांप्रतीश्वरस्यसमवायिकारणत्वाभावेनप्रमासमवायिकारणत्वलक्षणप्रमातृत्व
स्यतत्राभावात्। तथाचेश्वरेप्रमातृत्वोक्तीर्ननंमंत्राश्चुर्वेदप्रामाण्यवच्चतत्प्रामाण्यमाप्तप्रामाण्यादिति राम

टीका॥साक्षात्करिष्णुप्रत्यक्षेनित्ययोगिनिसदासंवेद्य[illegible]प्रत्यक्षानपेक्षस्थितिकेएतादृशोभूतार्थानुभवेनिविष्टोविषयीभूतोनिखिलप्रस्तारिवस्तूनांनानापदार्थानांक्रमोवास्तितोभावोयस्यसःतादृशानुभवविषयविश्वकइतिपूर्वार्धः।लेशतोप्यदृष्टिविरोधादर्शनं।तन्निमित्तिकायादृष्टिःरागद्वेषमोहात्मिकाः तद्विरामेनअप्रवृत्तिरंकानुषः॥वेदाप्रामाण्यरंकालेशोयस्मादितियद्वाएतादृशादृष्टिविगमेनप्रवृत्तिरंकानुषायत्रसःतत्ररंकावज्रिरपरेःपाखंडैःकिं।अथवाअप्रामाण्यरंकाविषयेमन्वादिभिःकिंतैस्तस्यनान्यथासिद्धिरितिभावः॥६॥ इतिचतुर्थस्तवकव्याख्यासमाप्ता॥ ॥मूलं॥कार्यायोजनधृत्यादेःपदात्प्रत्ययतःश्रुतेःवाक्यात्संख्याविशेषाच्चसाध्योविश्वविदव्ययः॥७॥ ॥टीका॥एतावताप्रबंधेनेश्वरसिद्धौबाधकंनिरस्यसाधकमाह।कार्येति।अत्रकार्येत्यादौभावप्रधानोनिर्देशः।प्राचीननयेतादात्म्यसंबंधस्यव्याप्यत्तान ॥५४॥ वछेदकत्वेनयथाश्रुतेसंगतेः।पंचम्यर्थस्तुप्रयोज्यत्वं।अन्वयश्चास्यसाध्यपदार्थेमितिविषयैकदेशानुमितीतथाचकार्यत्वायोजनत्वधृतित्वादिपदत्वप्रत्ययत्ववाक्यत्वसंख्याविशेषत्वात्मकत्रिविधहेतुप्र [illegible]

योऽयानुमितिविषयोविश्वविषयकनित्यज्ञानाश्रयोनित्येश्वरइतिसंपूर्णकारिकार्थः। अत्रविश्वविषयकज्ञाने
नित्यत्वविशिष्टस्याव्ययत्वाच्चयोद्देश्यः। आयोजनंकरणव्युत्पत्त्याकर्मधृतित्वादीत्यादिपदार्थोनाशत्वंपद
पदार्थः पद्यतेज्ञायतेऽनेनेतिव्युत्पत्त्याव्यवहारःप्रत्ययपदार्थःप्रमासंख्याविशेषोद्वित्वादिः॥ एवंचकार्यस
कर्तृकंकार्यत्वात्घटादिवत्सर्गाद्यकालीनद्व्यणुकारंभकपरमाणुसंयोगजनकंकर्मप्रयत्नवज्जन्यंकर्मत्वात्
अस्मदादिशरीरक्रियावत्। ब्रह्मांडादिधृतिःप्रयत्नवज्जन्याधृतित्वात्वियतिविहंगमधृतिवत्। ब्रह्मांडादिवि
नाशःप्रयत्नवज्जन्यः। नाशत्वात्पाच्यमानपटनाशवत्सर्गाद्यकालीनघटानयनादिव्यवहारःप्रयत्नवज्ज
न्यःव्यवहारत्वादिदानींतनव्यवहारवत्। वेदजन्याप्रमाणुपजन्याप्रमात्वात्प्रत्यक्षप्रमावत्। वेदःपौरुषे
योवेदत्वात्व्यतिरेकेगगनादिवत्। वेदःपौरुषेयो [illegible] वाक्यत्वात्भारतवत्। सर्गाद्यकाली
नद्व्यणुकपरिमाणजनकत्वेद्वित्वसंख्याअपेक्ष्यावृद्धिजन्याद्वित्वत्वात्अस्मदाद्यपेक्षावृद्धिजन्यद्वित्ववदित्य
नुमानेरीश्वरसिद्धिरितिभावः। नचात्राप्रयोजकत्वंशङ्क्यं [illegible] तोनिरूपधिसहचारस्येवानुकूलतर्क

लात्अत्रायानुमानेकृतिसाध्यत्वरूपंकार्यत्वंपक्षतावच्छेदकं।सिद्धसाधनप्रसंगात्।किंतुप्रागभावप्रति
योगित्वेसतिसत्वंपक्षतावच्छेदकावच्छेदेनसाध्यसिद्धेरुद्देश्यत्वात्।घटादिरूपकार्यस्यकर्तृत्वसिद्धौना
शात:सिद्धसाधनं।साध्यमत्रसकर्तृकत्वंलाघवान्नतुवर्थंपरित्यागेनकृतिजन्यत्वमेवलथात्वसिद्धिंकुर
पर्वतादावस्मदादिकृतिवाधेनयादृशाकृतिजन्यत्वंसिध्यतितादृशाकृत्याश्रयत्वेनेश्वरसिद्धिरितिभाव:।प्रकृ
तानुमानेरेवचकृतेस्तदाश्रयस्यचैकत्वेनि त्यत्वेलाघवमितिज्ञानसहकारेणनित्यत्वैकत्वेसिध्यत:।
लाघवज्ञानसहकारेणव्यापकतानवच्छेदकस्यापनुभितौभानात्एवंश्रुतिसिद्धसर्वविषयकज्ञानेकुंचो
प्यैकत्वनित्यत्वेलाघवादेवसिध्यत:।तयोर्नानात्वेउत्पादविनाशाकल्पनेचगौरवात्।स्यादेतत्।ज्ञानादीनां
सर्वविषयत्वसिद्धि:कस्मादितिचेन्नित्यत्वेनेवत्यवेहि।ज्ञानारनिपतविषयकत्वैकारणाधीनत्वेनकारण ॥५५॥
भावेननिपतविषयकत्वाभावात्।एकसंवाद्यआत्मानात्मोभयवृत्तिभिन्नदु:खसमानाधिकरणद्वित्वशून्य
त्वमीश्वरस्यतादृशा[redacted]द्वित्वासमानाधिकरण्यंचतद्वानादेर्वोध्यं।एता राम

दृश्यैकत्वस्यजीवात्मतज्ज्ञानसाधारण्येपीश्वरदृश्यनित्यज्ञानादिद्वयवारकत्वात्।ननुवैलक्षण्यावच्छेदकावच्छेदेनसाध्य
सिद्धेरुद्देश्यत्वात्सामानाधिकरण्येनसिद्धसाधनस्यादोषत्वेपिजन्यत्वावच्छेदेनस्मित्यादिजनकादृष्टजनक
स्मदादियागादिगोचरकृतिजन्यत्वमादायसिद्धसाधनमर्थांतरंचेतिचेन्न।स्वोपादानगोचरापरोक्षज्ञा
नचिकीर्षासमानाधिकरणकृतिजन्यत्वस्यविवक्षितत्वात्।अत्रगोचरांतंसमानाधिकरणांतंचकृतिविशे
षणंतथासतिनोक्तदोषःयागादिगोचरास्मदादिकृतेःस्वोपादानगोचरत्वाभावात्।नचगोचरांतेनैवोक्त
दोषवारणेसमानाधिकरणांतंकृतिविशेषणमनर्थकमितिवाच्यं।व्यावृत्त्याभावेनुपरंजकत्वेनैवतथावि
धविशेषणस्यसार्थकत्वात्।उपरंजकत्वंचोद्देश्यीभूतत्वघटितसाध्यसिद्धिविषयत्वंप्रकृतेचज्ञाने ज्ञासमा
नाधिकरणत्वेनकृतेरुद्देश्यत्वादुपपन्नं।एतदभिप्रायकएवव्यापकेव्यर्थविशेषणत्वंनदोषायेतिप्राचां
सिद्धांतः।नचतथापिदृष्टांतपक्षसाधारणस्यैकत्वस्याभावान्नद्वैतिधर्मस्यसाध्यत्वंनसंभवतीति
वाच्यं।प्राचीनमतेस्वत्वस्यैकत्वात्।अन्यथाद्वैतिस्वदारान्गच्छेत्यादौस्वत्वेनचैत्रादीनांसर्वानुभवसिद्धो

धस्यानुपपत्तेः। स्वत्वस्यैक्याभावेतुस्वत्वमनिवेश्यादृष्टाद्वारकोपादानगोचरताद्वाकृतिजन्यत्वस्यविशेष्य
तासंबंधावच्छिन्नकृतनिष्टकारणतानिरूपितसमवायावच्छिन्नजन्यत्वस्यवासाध्यत्वाद्दोषात्। नच ध्वंसे
व्यभिचारःसमवायसंबंधावच्छिन्नकार्यत्वस्याभावत्वविशिष्टकार्यत्वस्यवाहेतुत्वाद्व्यभिचाराभावात्। साध्ये
अदृष्टाद्वारकत्वमनन्यजनकादृष्टजनकजन्यकृत्यन्यत्वेसतिजन्यत्वंवोध्यम्। अथतत्पुरुषीयघटाद्य
र्थिप्रवृत्तित्वावच्छिन्नंप्रतितत्पुरुषीयघटादिसाधनत्वप्रकारकोयःप्रत्यक्षत्वेनहेतुत्वावश्यकत्वात्प्रत्य
क्षस्यकार्यत्वावच्छिन्नंप्रतिहेतुत्वेमानाभावः। तथाचिकीर्षायाअपिप्रवृत्तावेवहेतुत्वंतथैवान्वयव्यतिरेकात्। कृ
तेश्चवेज्ञात्यमंतर्भाव्यघटपटत्वाद्यवच्छिन्ना। एवहेतुत्वाद्यणुकादिहेतुत्वेमानाभावइतिचेन्न। प्रवृत्तौज्ञातायाम्
पितमसिघटाद्यनुत्पत्तेःप्रवृत्त्यादावितरघटादावपितयोर्हेतुत्वसिद्धेः। तत्रघटत्वपटत्वादीनामानंत्याकार्ये
त्वमेवसाधारण्याकार्यतावच्छेदकंकल्पते। शरीरलाघवमपेक्ष्यसंग्रहकलाघवस्यन्याय्यत्वात्। कृतेस्तु
यद्विशेषयोरितिन्यायात्सामान्यतोपिहेतुत्वमितिद्व्यणुकादौहेतुत्वमप्रत्यूहमेव। ननुकथंसामान्यतो

॥५६॥

पिहेतुत्वंकार्यत्वस्यानुगतस्यदुर्वचत्वात्।नचप्रागभावप्रतियोगित्वंतत्प्रतियोगित्वस्यस्वरूपसंबंधविशेषा
त्मकस्यतत्तत्प्रतियोगिरूपत्वेनानुगतत्वादितिचेन्न।स्वाश्रयप्रतियोगिताकत्वसंबंधेनप्रागभावत्वक
त्वरूपकार्यत्वस्यानुगतस्यसुवचत्वादित्यास्तांविस्तरः।अथैवमिष्टसाधनतानुमितेरपिहेतुत्वादनु मि
तिरपिनित्यास्यादितिचेन्नाइष्टसाधनताप्रत्यक्षादेरपिहेतुत्वात्तदनुमितित्वेनाहेतुत्वादित्यास्तांविस्तरः।
ननुसंयोगकलाघवत्वेनैवकार्यशरीरजन्यंकार्यत्वात्घटवदित्यनुमानोत्थशरीरत्वेनहेतुहेतुमद्भावो
भ्युपेयतांतथाचसृष्टेर्यंकुरादिजनकमितरबाधाज्जीवस्येवईश्वरस्यशरीरित्वमपिस्यादितिचेन्न।ईश्व
रेशरीराभावबोधकेनापाणिपादोजवनोगृहीतापश्यत्यचक्षुः सशृणोत्यकर्णइत्यादिश्रुतिसहस्रेण
शरीरनियतभोगाभावेनचशरीराभावसिद्धौतादृशानुमानबाधेनेश्वरशरीरसिद्ध्यसंभवात्।ईश्व
रेशरीरभावसिद्धौसृष्टेर्यंकुरादौव्यभिचारेणागत्याघटत्वपटत्वाद्यवच्छिन्नंप्रत्येवततत्कर्तृशरीरत्वेनहेतुत
याकार्यत्वावच्छिन्नंप्रतिशरीरत्वेनहेतुत्वस्यासिद्धावुक्तानुमानस्याप्रयोजकत्वाच्चसकर्तृकत्वानुमा

नेतुबाधव्यभिचाराद्यभावस्तर्कश्चोक्तोवक्ष्यते।सावतास्कअपाणिपाद इत्यादिश्रुतीनांप्राकृतशरीराभा
वमात्रबोधकत्वेनभोगस्यशरीरनियतत्वेमानाभावेनचेश्वरेशरीराभावसिद्ध्यावाधाभावेनक्षित्यंकुरादौव्य
भिचारनिर्णयेनकृतेरिवशरीरस्यस्वप्रयोज्यविजातीयसंयोगसंबंधेनलाघवात्कार्यत्वावच्छिन्नंप्रतिहे
तुतयाप्रयोजकत्वाभावेनचोक्तानुमानादीश्वरशरीरसिद्धेर्बाधकाभावेनेश्वरस्यशरीरित्वमिष्टमेवत
च्छरीरंनित्यंलाघवात्।तज्ज्ञानचेष्टादयोपिनित्यएव।अतएवकार्यत्वेनचेष्टात्वेनहेतुहेतुमद्भावउ
पपद्यते।ननुतच्छरीरस्यसावयवत्वेविनाशप्रसंगः।सावयवस्यघटादेरिवविनाशित्वनियमात्।नि[illegible]
निरवयवत्वेनुसंज्ञामात्रभितिचेन्न।सावयवत्वेनविनाशेसाध्येप्राकृतस्योपाधित्वात्।।स्थूलशरीरि
त्वेसूक्ष्मनरपाषाणमध्यवर्त्तिकीटादिशरीरकर्तृत्वानुपपत्तिः।अणुशरीरत्वेवसकलकार्यकर्तृत्वानुप ॥५७॥
पत्तिरितिशंक्यं।अचिंत्यालुप्तानेकशक्तिकतयातत्तत्कार्यानुगुण्यशरीरपरिग्रहेणसकलकार्यकर्तृ
त्वसंभवादित्याहुः।नचिंत्यं।अथाशरीरस्यब्रह्मणस्तन्नवोग्रीवमुखादिलक्षणःकालोत्थःप्रमाणोऽन्नंब्रह्मा राम

विष्णुरुद्रलेकेऽन्यमभिधायलेकेऽन्यमित्यादिमे त्रापणीपश्चतावन्यत्रचश्चतोब्रह्मणोमाभिकोपिदेहो
नास्तिअग्न्यादिदेहाएवदेहइतिनिर्देशेनब्रह्मणोमापिकलीत्वाविग्रहस्याप्यभावज्ञापनात्।येतुचतुर्मुख
चतुर्भुजपंचमुखप्रभृतयस्तेतुपुराणायेवंगतमोरागादिलिंगेनजीवविशेषाएवोपासनार्थंपरमेश्वरउ
च्यतेनतत्वतःब्रह्मविष्णुशिवाब्रह्मन्प्रधानाब्रह्मराक्षयः।ततोन्यूनाश्चमैत्रेयदेवायसादरस्तथा।ब्रह्मविष्णुमहे
शानांयःपरःसमहेश्वरइत्यादिस्मृत्यातथावबोधनादितिनैयायिकानामाम्नायः॥१॥ ॥मूलं॥नबाधोस्योपजीव्य
त्वान्नतिबंधोनदुर्बलः।सिद्धसिद्धोविरोधोननासिद्धिरनिबंधना॥२॥ ॥तर्कोभासतयान्येषांतर्कोश्रुद्धिरदू
षणं।अनुकूलस्तुतर्कोत्रकार्यलोपोविभूषणम्॥३॥ ॥टीका॥ननुकार्यंसकर्तृकंकार्यत्वात्घटवदित्यनुमा
नात्कथमनीश्वरिकर्तृजन्यत्वसिद्धिः।ईश्वरेनीश्वराभावेनकर्तृत्वाभावसिध्याकर्तृत्वरूपविशेषणावाधात्मकवि
शिष्टबाधस्यतन्प्रतिबंधकस्यएवंसाध्यतावच्छेदककोटिप्रविष्टेकविशेषणेपरविशेषणविरोधज्ञानस्याप्य
नुमितिप्रतिबंधकत्वयाकर्तृत्वेनीश्वरित्वविरोधज्ञानस्यापितथाविधानुमितिप्रतिबंधकस्यसंभवात्॥एवंना

यैमकर्तृकंशरीरंजन्यत्वादित्यनुमानेनसत्प्रतिपक्षितत्वात्। शरीरजन्यत्वादुपाधिनाकार्यत्वहेतोर्व्याप्यत्वा
सिद्धेश्चेत्यनाहनबाधोऽस्येति॥उपदर्शितानुमितिप्रतिबंधकविशेषणबाधात्मकविशिष्टबाधोनसंभवति।
अस्यकार्यत्वलिंगकेश्वरसिध्यनुमानस्योपजीव्यत्वात्तदभावबुद्धावधिकरणज्ञानस्यहेतुतया [redacted]
[redacted]अधिकरणज्ञानसंपत्यर्थं तत्रास्यावश्यंमपेक्षणीयत्वात्तथात्वाधिकरणज्ञानाभा
वेनतथाविधानुमानात्पूर्वंतादृशबाधबुद्धेरसंभवेनानुपपत्त्यभावइत्यर्थः।उपदर्शितबाधदोषंनिराकृत्य
प्रकृतहेतोःसत्प्रतिपक्षतांनिराकरोति। प्रतिबंधइत्यादि।शरीरान्नावेत्यर्थेनव्याप्यत्वासिध्यऽखंडाभाव[illegible]घ
टकत्वेप्यनुकूलतर्काभावेनाप्रयोजकतयाऽजन्यत्वरूपोपाधिमत्त [illegible]योवशरीराजन्यत्वादिरुपकुवलहेतु
निःप्रतिबंधःसत्प्रतिपक्षीनेत्यर्थः।अथियप्रत्यनुमानेकार्यत्वसामानाधिकरण्येनपक्षत्वेसत्प्रतिपक्षासे
भवःजन्यत्वावच्छेदेनपक्षत्वेचघटादौहेत्वसत्वेनभागसिद्धिरिति।तेनसत्प्रतिपक्षशंकैवनोदेति।तथाप्यनु
मानेऽवच्छेदकावच्छेदेनसाध्यसिद्धेरुद्देश्यतयाऽवच्छेदकावच्छेदेनविशिष्टबुद्धेसामानाधिकरण्येनापितद्

॥५८॥

भावव्याप्यवत्ताज्ञानस्यप्रतिबंधकतयाप्रत्यनुमानेसामाधिकरण्येनपक्षतायामपिसत्प्रतिपक्षसंभवाच्छं
कावोध्यासत्प्रतिपक्षरूपदोषमुद्भाव्यप्रकृतानुमितिप्रतिबंधकीभूताशरीरित्वकर्तृत्वयोर्विरोधज्ञानम
पिनसंभवतीत्याहसिद्ध्यसिद्ध्योर्विरोधेनेतिउपदर्शितानुमानेनाशरीरकर्तृसिद्धेतमंतर्भाव्याशरीरकर्तृ
त्वयोःसामानाधिकरण्यान्नयोर्विरोधज्ञानमसंभवितद्प्रसिद्धोवाशरीरीत्वकर्तृत्वयोरीश्वरलक्षणैकाधिक
रण्यवृत्तित्वाभावलक्षणविरोधघटकेश्वररूपाधिकरणाप्रसिद्ध्यासुनरांनेत्यर्थः।अशरीरित्वकर्तृत्वयोर्विरोध
ज्ञानरूपंप्रकृतानुमितिप्रतिबंधकंनिरस्यव्याप्यत्वासिद्धिंनिरस्यतिं।शरीरजन्यत्वोपाद्यघानाव्याप्यत्वासि
द्धिन्नेनिश्चितोऽनिबधना अनुकूलतर्कीभावरूपंपक्ष्यप्यत्वासिद्धिनिबंधनंतच्छून्येत्यर्थःप्रकृतेनुकूलतर्कस
त्वेनतद्ग्राहितव्यभिचारज्ञानस्याकिंचित्करत्वात्।अनुकूलतर्कीभावविशिष्टस्यैवतद्ग्राहितव्यभिचारज्ञानस्यव्या
प्तिज्ञानप्रतिबंधकत्वाभ्युपगमात्।अनुकूलतर्कश्चकार्यत्वरूपहेतोरकृतिजन्यत्वरूपसाध्यव्याप्यत्वनिर्ण
येसाध्यव्याप्यहेत्वव्याप्यत्वेनसाध्याव्यापकत्वानुमानेनसाध्यव्यापकत्वाभावनिर्णयेनोपाधित्वासंभवाद्वे

तिभावः॥२॥ननुईश्वरोय[illegible]यात्तदाशरीरीस्यादित्याकारकप्रतिकूलतर्कसत्वात्विपक्षबाधकतर्कोभा
वाच्चकथंकार्यत्वलिंगकानुमानादिएसिद्धिरित्यतआहतर्कोभासतयेति।प्रदर्शितप्रतिकूलतर्कोणांतर्को
भासतयाईश्वरासिद्ध्याआश्रयासिद्धिदोषेणासंभवितयातर्कोश्रुतिरदूषणंउक्तप्रतिकूलतर्केणप्रकृ
तानुमानरूपव्याघातरूपंदूषणंनसंभवतिअनुकूलस्तुविपक्षबाधकतर्कस्तुकार्यलोपःक्षित्यादिकंयद्य
कर्तृकंस्यात्तर्हिकार्येनस्यादित्याद्याकारकःकार्यान्योन्याभावापादकः।विभूषणं।प्रकृतानुमानानुग्राह
कंइतिसंपूर्णकारिकार्थः एतादृशतर्कोपस्तुतोहंसर्वस्यप्रभवोमत्तःसर्वंप्रवर्त्ततइत्याद्यागमोपीश्वर
साधकःआर्षंधर्मोपदेशंचवेदशास्त्राविरोधिना।यस्तर्केणानुसंधत्तेसधर्मंवेदनेतरइत्यादिनातर्कानु
गृहीतागमस्यैववलवत्त्वात्।आर्षमन्वादिवाक्यंधर्मजनकोपदेशंधर्मेश्वरस्तुपदेशंवावेदम्॥३॥॥ ॥५९॥
मूलं॥स्वातंत्र्येजडतानिर्नादृष्टंदृष्टघातकं॥हेत्वभावेफलाभावाद्विशेषस्तुविशेषवान्॥४॥ ॥क्षित्या
दिपक्षकसकर्तृकत्वसाध्यकानुमानेऽनुकूलतर्कंप्रदर्श्यसर्गाद्यकालीनपरमाणुकर्मपक्षकप्रयत्नवज्जन्य

लक्षाध्यकानुमानेनप्रदर्शयति॥स्वातंत्र्यइतिस्वातंत्र्येपरमाणोः। कर्तृरूपचेतनप्रेरणेसृष्ट्युपसर्गीयकालीन
परमाणुक्रियाजनकत्वेजडत्वहानिः।परमाणोश्चेतन्यताहानिःस्यात्। कार्यस्यचेतनजन्यत्वनियमेन
परमाणावेवचेतन्याभ्युपगमस्यावश्यकत्वादितिभावः॥ननुचेतनेनादृष्टसहकारेणैवफलमुत्पाद्यतेन
तुसहकारेणेतितथाविधनियमोऽसिद्ध इत्यतआह।नादृष्टमिति।अदृष्टंदृष्टनिष्टकारणाताविघातकं
नेत्यर्थः।कर्तृरूपचेतनंविनानफलोत्पादकमितियावत्। तत्रहेतुमाहहेत्वभावेफलाभावादितिक्रियामात्रं
प्रतिकृतित्वेनहेतुतयाकर्त्तारंविनापरमाणोस्तथाविधक्रियानुत्पत्तिप्रसंगादितिभावः।ननुक्रियात्वेनकृति
त्वेनहेतु[illegible]हेतुमज्ज्ञावोऽपितुचेष्टात्वेनभोक्तृप्रयत्नत्वेनहेतुहेतुमद्भावोऽतोनानुपपत्तिरित्यतआह॥
विशेषस्तिति।विशेषस्तुचेष्टात्मककार्यविशेषस्तुविशेषवान्भोक्तृप्रयत्नरूपकारणविशेषजन्यइत्यर्थः।
तच्चयद्विशेषयोःकार्यकारणभावोऽस्तिबाधकेतत्सामान्ययोरपीतिन्यायान्नथाविधविशेषकार्यकारणभा
वसत्वेपिसामान्यकार्य[illegible]णभावस्यावश्यकतयातदनुरोधेनेवतथाविधक्रियाकर्तृचेतनाभ्युपग

मआवश्यक इतिभावः॥४॥ ॥मूलं॥कार्यत्वान्निरुपाधित्वमेवंधृतिविनाशयोः॥विच्छेदेनयदृस्यापिप्रत्ययादेश्चतथा
वैवत्॥५॥ ॥मनुतथापिधृतित्वादेःप्रयत्नवज्जन्यत्वव्याप्यत्वेमानाभावात्कथंधृत्यादिपक्षकप्रयत्नवज्जन्यत्व
साध्यकानुमानादेरसिद्धिस्तत्राह॥कार्यत्वादिति॥एवंउक्तसामान्यकार्यकारणभावानुरोधाद्धृतिविनाश
योःधृतिकार्यत्वाद्धृतित्वादिलिंगकानुमानेपूर्ववत्॥निरुपाधित्वंसकर्तृकत्वसाध्यककार्यत्वहेतोरिवधृतित्वादि
हेतोर्निरुपाधित्वंसाध्यव्याप्यत्वमित्यर्थः॥एवंपदस्यापिनिरुपाधित्वंकार्यत्वादेवपदव्यावृत्त्यवधारणपरः॥ननुपू
र्वपूर्वव्यवहारानुच्छेदेनोत्तरोत्तरव्यवहारःसेत्स्यतीतिनेश्वरसिद्धिस्तत्राहविच्छेदेनेति॥प्रलयपूर्वव्यवहारविच्छेदेना
दिमोध्यवहारोभगवतेवभविष्यतीतिभावः॥प्रत्ययादेश्चतथाविधविच्छेदविशिष्टप्रमायाअपिकार्यत्वादेवप्र
मात्वलिंगकानुमानेहेतोर्निरुपाधित्वमितिभावः॥५॥ ॥मूलं॥उद्देशएवतात्पर्यव्याख्याविश्वदृशःस्मृतौ॥ईश्व ॥६०
रादिपदंसार्थंलोकवृत्तानुसारतः॥६॥ ॥टीका॥कार्यत्वोद्भावनेत्यादिकंप्रकारांतरेणव्याख्यानुमाह॥उद्देशएवेति॥ता
त्पर्येणार्थोद्भावनकत्वंशब्दस्यार्थोद्भावनकत्वात्॥नापियच्छब्दस्यप्रतिपादकंनस्यतत्रतात्पर्यंअप्रतिपाद्यप्रवृत्त्यादौतात्प राम

र्थीभावापत्तेः। किंनुतदिच्छयोच्चारणं। एवंचउद्देश्यइच्छेवतात्पर्यमत्रलक्षणयाकार्यपदार्थस्तात्पर्यविषयएव
शब्दप्रामाण्याद्वेदेयस्यतात्पर्यंसएवेश्वरइतिभावः। आप्तोजनपदार्थमाह। व्याख्यति। विश्वदृग्यः सर्वज्ञस्य
व्याख्यासतीपथार्थनिश्चितप्रामाण्यावेदाःकेनचिद्व्याख्यातत्वेनेश्वरसिद्धिरितिभावः। वेदस्तुत्वेनेश्वरादि
पदस्यसार्थकतावश्यकतयातदर्थत्वेनापीश्वरसिद्धिरित्याह। ईश्वरादिति। आदिनाअहंसर्वस्यप्रभवोमत्तःसं
प्रवर्त्ततइतिवाक्यघटकीभूताऽहंपदादिपरिग्रहः तथाचेश्वरादिपदंशक्त्याकिंचिदर्थबोधकंसाधुपदत्वा
दित्याद्यनुमानादितरबाधेनेश्वरसिद्धिरितिभावः। ननुतात्पर्यविनैवेदप्रामाण्यमस्कृतत्राहलोकेति। लोकवे
दयोः। सामग्रीभेदकल्पनेप्रमाणाभावादितिभावः॥६॥ ॥मूलं॥प्रवृत्तिःकृतिरेवात्रसाचेच्छानोयतश्चसा॥
तज्ज्ञानंविषयस्तस्यविधिस्तदायकोथवा॥७॥ ॥टीका॥विध्यर्थालोचनतोपीश्वरः। सिद्ध्यतीत्याशयवा
नाह। प्रवृत्तिरिति। अत्रपुरुषेविधिजन्यज्ञानाद्याप्रवृत्तिः स्वरूपेवसात्रकृतिरिच्छातत्रिकीर्षितः। साचि
कीर्षायतोयस्माज्जायतेतज्ज्ञानंतत्कृतिसाध्यत्वेष्टसाधनत्वप्रज्ञानंतस्यतज्ज्ञानस्यविषयः। कृतिः

साकृतिः

साध्यत्वमिष्टसाधनत्वंनविधिर्विध्यर्थः।इत्यनेनप्राचीनमतमुद्भ्य।स्वमतमाह।तज्ज्ञापकोथवेति।यागादिरिष्टसा
धनत्वादिमान्आप्ताभिप्रायविषयत्वादित्यनुमानेनेष्टसाधनत्वादिज्ञापकआप्तनिप्रायएवलिङादि
परपर्यायोविध्यर्थइत्यर्थः।वैदिकविधौचाप्तः॥सर्वज्ञोभगवानेवपरिशेषादितिभावः॥७॥ ॥मूलं॥इष्टहा
नेरनिष्टाप्तेरप्रवृत्तेर्विरोधतः।असत्वात्प्रत्ययत्यागात्कर्तृधर्मोनशंकरात्॥८॥ ॥टीका॥अत्राप्तोक्तकीर्त्तनं
वस्तुगतिमनुरुध्यनतुशाक्यतावच्छेदककोटावर्पितनिवेशइतिस्वमतमुपपादयितुंमतांतरंदूषयति।इ
ष्टहानेरिति।कर्तृधर्मस्यंदलक्षणोविध्यर्थस्तज्ज्ञानमेवप्रवर्त्तकमित्येके।तत्रकुतः।इष्टहानेःआत्मानंजानी
यादित्यादौस्यंदासंभवेनविधिप्रयोगलक्षणेष्टहान्यापत्तेः।एवंग्रामंगच्छेत्यादौस्यंदसत्वेनविधिप्रयो
गप्रसंगानिष्टाप्तेश्चेत्यर्थः।वस्तुतःस्यंदज्ञानकालेइष्टसाधनताज्ञानानेयत्यात्।अनिष्टसाधनताज्ञान
संभवाच्चप्रवृत्त्यनुत्पत्तेरित्यर्थः।तथाचप्रवृत्तिप्रयोजकज्ञानविषयस्येवविध्यर्थत्वनियमेनस्यंदेतथात्वाभावा
न्नविध्यर्थत्वमितिभावः॥ननुपक्वलक्षणः।कर्तृधर्मोगृह्यतामतआह॥विरोधतइति।इष्टसाधनत्वा द्यप्रति

संधानेआख्यातांतसाधारण्यात्तज्ज्ञानस्याप्रवर्त्तकत्वादित्यर्थः॥नन्विच्छालक्षणःकर्त्तृधर्मोगृह्यतामतआ
ह॥विरोधतइति॥इच्छाज्ञानंइच्छाजनकंइच्छाचज्ञानजनिकाअन्योन्याश्रयेणकर्त्तृधर्मोपायेच्छांप्रतिहेतुत्वा
संभवादित्यर्थः॥तथाचोपायेच्छाजनकज्ञानविषयस्यैवविध्यर्थत्वनियमेनान्योन्याश्रयेणकर्त्तृधर्मोपायेच्छा
यास्तदभावान्नविध्यर्थत्वमितिभावः॥ननूपायेच्छांविनापिविधितएवोपायेच्छाज्ञानसंभवान्नान्योन्याश्रय
इतिनकर्त्तृधर्मोपायेच्छायाविध्यर्थत्वमनुपपन्नमित्यतआह॥असत्वादिति॥उपायेच्छांविनासाक्षात्परंपरया
वातत्प्रयोज्योपायेच्छाज्ञानस्यविधितोप्यसंभवादित्यर्थः॥तथाचोपायेच्छाज्ञानेसाक्षात्परंपरयावोपायेच्छोप
योगित्वस्यावश्यकतयाकर्त्तृधर्मोपायेच्छायाविध्यर्थत्वेउक्तान्योन्याश्रयोदुर्वारइतिभावः॥ननुविधिरेवोपा
येच्छाज्ञानमिवोपायेच्छांजनयिष्यतितत्राह॥प्रत्ययत्यागादिति॥प्रत्ययस्यज्ञानस्यत्यागात्॥इच्छाहेतुत्वत्यागश्च
संगादित्यर्थः॥ज्ञानंविनायिविधितइच्छोत्पत्त्याव्यभिचारेणज्ञानेइच्छाहेतुत्वासंभवादितिभावः॥नन्वेवंफलज्ञा
नाधीनफलेच्छैवविध्यर्थोऽस्तित्यतआह॥संकरादिति॥प्रवृत्तिजनकस्येष्टसाधनताज्ञानसहचरितत्वनियमा

दित्यर्थः॥अयंभावः।अनिष्टसाधनताज्ञानकालेप्रवृत्त्यसंभवात्प्रवृत्तिंप्रतीष्टसाधनताज्ञानस्यहेतुत्वमवश्यवाच्य
मूलञ्चप्रकारांतरेणनसंभवतीति।इष्टसाधनत्वेविध्यर्थत्वमावश्यकंतथाचावश्यकत्वान्नहेत्वविध्यर्थौस्तुकिं
फलेछाद्यास्तदर्थत्वाभ्युपगमेनेतिभावः॥८॥ ॥मूलं॥कृताकृतविभागेनकर्तृरूपव्यवस्थया॥यत्नएवकृतिः
पूर्वापरस्मिन्नेवभावना॥९॥ ॥टीका॥कर्तृधर्मयत्नस्यविध्यर्थत्वेकथितदोषसत्वेपिपचतीत्यादौप्रवृत्याप
त्तिरूपदोषांतरंदातुमाख्यातसामान्यस्यवाचकत्वंव्यवस्थापयति॥कृताकृतेति।व्यापारजन्यत्वप्रतिसं
धानाविशेषेपियत्नजन्यत्वप्रतिसंधानाभ्यांघटःकृतः॥अंकुरोनकृतइतिव्यवहारेणकर्तृरूपव्यवस्थया॥
घटस्यकर्त्ताकुलालोनचैत्रइतिव्यवहारेणचयत्नएवकृतिः।यत्नएवकृत्योऽर्थः।ननुभवतुकृञ्धात्वर्थोयत्नो
नत्वाख्यातार्थः।भावनायाआख्यातवाच्यत्वादत्तआहपूर्वेति।परस्मिन्फलेपूर्वोकारणीभूताकृतिरेवभावनान ॥६२॥
त्वतदितिभावः॥९॥ ॥मूलं॥भावनेवहियत्नात्मासर्वाख्यातस्यगोचरा॥तयाविवरणध्रौव्यादाक्षेपानुपपत्तितः॥य
॥१०॥ ॥टीका॥ननुभवतुकृतियत्नभावनानामभेदः॥नतुतत्राख्यातस्यशक्तिस्तथासतिरथोगच्छतीत्यादौय राम

त्वबाधेनाख्यातार्थबोधानुपपत्तेरित्यतआह।भावनेचेति।यत्नात्माभावनैवसर्वाख्यातवाच्या।यतस्तत्रायत्ना
त्मकतयैवविवरणग्रौव्यात्।पचतिपाकंकरोतीतियत्नार्थकुरुकरोतिनाविवरणनिर्वाहादितिकारिकातत्तीय
चरणार्थः॥तथाचतथाविधविवरणान्यथानुपपत्त्याख्यातस्ययत्नवाचकत्वमावश्यकमूअचेतनेरथोग
ढतीत्यादौबानुकूलव्यापारादौलक्षणयानानुपपत्तिरितिभावः।नन्वनन्यलभ्यस्यशाब्दार्थतयाचैत्रः पा
कफलवानूपाकानुकूलव्यापारवत्त्वादित्यनुमानलभ्येयत्नेकथमाख्यातपदंबाच्यत्वंतत्राह।आक्षेपेतिपा
कानुकूलव्यापारवत्त्वस्यकाष्ठादिसाधारणत्वेनव्यभिचारितयादर्शितानुमानासंभवादित्यर्थः।तथाचहेतो
र्व्यभिचारितयोपदर्शितानुमानासंभवेनयत्नस्यानन्यलभ्यत्वादाख्यातस्ययत्नवाचकत्वेबाधकाभावइति
भावः॥१०॥ ॥मूलं॥आक्षेपलभ्येसंख्येयेनाभिधानस्यकल्पना॥संख्येयमात्रलाभेपिसाकांक्षेणव्यवस्थि
तिः॥११॥ ॥टीका॥ननुविवरणाच्चेदाख्यातस्यपलेशक्तिस्तदातत्एवकर्तर्यपिशक्तिरभ्युपेयतांपचती
त्यादौपाकजनकफलवानितिकर्तुरपिविवरणादित्यतआह।आक्षेपेति।आख्यातवाच्यसंख्येयाक्षेपादे

वलभ्यसंख्येयेकर्त्तरिनाभिधानस्यनाख्यातन्यायेन कल्पनाअनन्यलभ्यस्येवन्यायेन शब्दार्थत्वनियमादितिभावः। नन्व संख्यायागुणत्वेनसंख्यात्वेनवास्वाश्रयमात्रलाभेपिसाकांक्षेणआख्यातपदसमभिव्याहृतचैत्रादिपदेन व्यवस्थितचैत्रत्वादिविशेषधर्मपुरस्कारेणकर्तुरुपस्थितिः। तथाचाख्यातसामान्यस्यानुकूलव्यापारो नार्थः। अपितुयत्नएवतज्ज्ञानंचेत्प्रवर्त्तकंतर्हिपचतीत्यादावपिप्रवृत्त्यापत्तिरितिभावः॥११॥ ॥मूलं॥ अतिप्रसंगान्नफलंनापूर्वात्तत्वहानितः। तदलाभान्नकार्यंचनक्रियाप्यप्रवृत्तितः॥१२॥ ॥असत्वाद्प्रवृत्तेश्चवाधितापिगरीयसी॥बाधकस्यसमानत्वात्परिशेषोपि दुर्लभः॥१३॥ ॥टीका॥नचैवंकार्यमेवविध्यर्थइतिकार्यविध्यर्थत्वमतेकार्यपदार्थोयदिस्वर्गस्तदादूषणमाह। अतिप्रसंगान्नफलमिति। स्वर्गसाधनत्वज्ञानाभावेपिस्वर्गज्ञानात्प्रवृत्यापत्तेः। कार्यपदार्थोनफलमित्यर्थः। ननुतर्हिअपूर्वंकार्यपदार्थोस्विदतआह। नापूर्वमिति। अपूर्वत्वहानितोनापूर्वंकार्यंन्यायेनशब्दार्थइत्यर्थः। शक्तिग्रहंविनाविधिप्रत्ययादपूर्वोपस्थितिर्नसंभवतीति। शक्तिग्रहश्चनापूर्वानुपस्थितौतथाचलिङादिपदनिरूपितन्यायशक्तिग्रहकालेपूर्वमपूर्वस्या

वश्यंप्रतीत्याङ्गाङ्गवोधात्पूर्वेमप्रतीतत्वरूपापूर्वत्वंतत्रभज्येतेतिभावः।ननुकार्यत्वेनोपस्थितेकार्यलिङ्
पदनिरूपितब्राह्मक्रियहेयोग्यतावशाच्छाङ्गवोधःपूर्वलाभइत्यतआह।तदलाभादिति।कार्यसामान्यमपि
नविधिराक्षिप्तंपूर्वालाभप्रसंगात्।इष्टसाधनेनोपस्थितिंविनाऽपूर्वस्यकार्यत्वेनविधिनावोधयितुम
शक्यत्वात्।इष्टसाधनत्वेनाभिमतस्यैवकामिकार्यत्वेनाभ्युपगमात्।इष्टसाधनत्वंहिस्वर्गनविधितस्तन्म
तेतत्राङ्गेः।नाप्यन्यतस्तादृग्यस्यतत्रानुपलंभात्।इतिभावः।ननुक्रियेवकार्यपदार्थोस्तुतत्राहनक्रियेति।
इष्टसाधनताज्ञानाभावदङ्गार्थंयागादिरूपक्रियाज्ञानात्प्रवृत्त्यभावेनक्रियापिनविध्यर्थइतिभावः।१३॥
॥मूलं॥हेतुत्वादनुमानाच्चमध्यमादौवियोगतः।अन्यत्रलक्षपसामर्थ्यान्निषेधानुपपत्तितः॥१४॥॥टी
का॥ननुप्रवर्त्तनाङ्गवाक्याअभिधेववाविध्यर्थास्तुतज्ज्ञानमेवप्रवर्त्तकमित्यत्राह।असत्यादिति[illegible]
[illegible]नुमानाभावेनाभिधायाअभावात्।नचाङ्गस्यप्रवृत्तिजनकत्वेनक्षपस्यइष्टसाधनताज्ञानस्यैवव्या
पारत्वात्।अपित्वाभिधानलिङ्गार्थइष्टसाधनताज्ञानंविनातज्ज्ञानादप्रवृत्तेः।नचपूर्वोक्तेवाधकात्परिशेषा

कु॰मां॰ ॥६५॥

दियमेवलिङर्थः॥अत्रापिबाधकस्योक्त्वादितिभावःयतःप्रदर्शितयुक्त्यापरिहारादुर्वलोऽनोऽभिधानलि
ङर्थः॥यतोगरीयसीइष्टसाधनताज्ञानस्यैवप्रवर्त्तकतयाप्रवर्त्तकज्ञानविषयस्येष्टसाधनत्वस्यविध्य
र्थत्वावश्यकत्वेनिरर्थकविधिशक्तिकल्पनागौरवयस्तामिधेतिनिर्गलितार्थः॥१३॥ ॥मूलं॥विधिर्वेनुरभि लि
प्रायः प्रवृत्त्यादौलिङादिभिः।अभिधेयोनुमेयातुकर्त्तुरिष्टाभ्युपायता॥१५॥ ॥टीका॥ननुकृतिसाध्य
त्वेसतिबलवदनिष्टाननुबंधित्वेसतीष्टसाधनत्वंकरणस्यागादेर्धर्मः।प्रवर्त्तकज्ञानविषयःविध्यर्थो
स्तुतआह।हेतुत्वादिति।अग्निकामोदारुणीमथ्नीयादित्युक्तेकुतइत्याकांक्षायांयतोदारुमथनमग्नि
साधनमित्युत्तरितेदारुमथनयत्नकविध्यर्थसाध्यकानुमानेइष्टसाधनत्वस्यविध्यर्थहेतुत्वादित्यर्थः॥
इष्टसाधनत्वस्यविध्यर्थत्वेआत्मभेदेनहेतुत्वासंभवेनतत्रतथाविधानुमानानुपपत्तिरितिभावः।हेत्वंतरमा ॥६५॥
ह।अनुमानाच्चेतितरति ग्राह्यहत्यांयोश्वमेधेनयजतेइतिविध्यर्थानुमानादित्यर्थः।इष्टसाधनत्वस्यविध्य
र्थत्वेतुतन्नस्यात्।विधेयतिरेकेणेवेष्टसाधनत्वस्यप्रतीत्वादितिभावः।हेत्वंतरमाह।मध्यमादौवियोग राम

त

त इतिमध्यमोत्तमपुरुषस्थलेलिङः इष्टसाधनत्वावोधकत्वादित्यर्थः। तत्राज्ञादेर्विध्यर्थत्वादितिभावः हेत्वं
तरमाह। अन्यत्रेत्यादि। आज्ञाअध्येषणानुज्ञाप्रार्थनाऽऽशंसालिङ्गमिच्छावाचकलकृल्पनादि
त्यर्थः। यस्याइच्छायाभंगेभयंसाआज्ञाथाश्रोतरिपूजासन्मानव्यंजिकासाअध्येषणायानिवार्यताभाव
यं जिज्ञासाअनुज्ञाअभिधानप्रयोजनादिजिज्ञासाप्रश्नः। नामेच्छाप्रार्थनीआशीराशंसाहेत्वंतरमाह।
निषेधानुपपत्तिरितिकृलंतभक्षणस्यतत्रिरूपेष्टसाधनत्वात्नकृजंभक्षयेदित्यत्रेष्टसाधनत्वनिषेध
स्यवाधितत्वादित्यर्थः। अत्रविध्यर्थस्येवनिषेधोनज्ञावोध्यइतिभावः॥१५॥ ॥मूलं॥कृत्स्नएकवेदो
यंपरमेश्वरगोचरः॥स्वार्थद्वारेवतात्पर्यंतस्यस्वर्गादिवद्विधौ॥१६॥ ॥टीका॥स्वमतमाह॥विधिरिति।
प्रवृत्तिनिवृत्त्योर्वक्तुरभिप्रायःसएवविधिर्विध्यर्थोलिङादिरभिधेयइत्यर्थः। प्रवर्तकंवुज्ञानमनुमाना
दित्याह। अनुमेयालिंगेति। प्रवृत्तिस्थलेइष्टसाधनतानुमीयतेआप्ताभिप्रायेणेत्यर्थः नकृलंतभक्षयेदिति
निषेधस्थलेतमभिप्रायनिषेधादनिष्टसाधनत्वमनुमीयतेइष्टसाधनत्वेनतन्निषेधासंभवादित्यभिप्रायः

इदमाद्यातत्तः। वक्तुरभिप्रायोविध्यर्थइत्यत्राभिप्रायस्तूद्देश्यार्थश्चेदिच्छातदानकलञ्जंभक्षयेदित्यत्रविध्यर्थेनिषेधानु
पपत्तिः। ईश्वरेच्छायाः सर्वविषयरकत्वेनविषयतासंबंधेनकलञ्जंभक्षणेपितत्सत्वात्। यदिचबलवदनिष्टानु
बंधीष्टसाधनत्वप्रकारकेच्छाअभिप्रायस्तूद्देश्यार्थस्तदा लाघवाद्बलवदनिष्टाननुबंधीष्टसाधनत्वएवविधि
शक्तिरस्तुकृतंप्रपांतरेणेति॥१५॥आद्यकारिकायाद्वितीयव्याख्यानेऽक्षतेरित्यस्यव्याख्यामाह। कृत्स्न
एवेति। अयंयद्यमानःसर्वएववेदःयज्ञेनयज्ञमयजंतःपश्यत्यचक्षुःयतोवाइमानिभूतानिजायंते। एतस्य
वाक्यस्यप्रज्ञासनेगार्ग्यावापृथिव्यौविधृतेतिष्टतः॥सत्यंज्ञानमनंतंब्रह्मेत्यादिकःपरमेश्वरगोचरतात्पर्येण
परमेश्वरप्रतिपादकः। नन्वर्थवादादिवसिद्धार्थतयास्वनस्वार्थेपरत्वंतत्राह। स्वार्थद्वारैवस्वर्गादिवद्विधाविति।
यथायउन्नेदुरवेनमित्यादेः। सार्थस्वर्गादिप्रतिपादनद्वारैवस्वर्गकाम्योयजेतेत्यादिविधौतात्पर्यान्नादृग्विध्येक ॥६५॥
नयाप्रामाण्यंतस्यप्रदर्शितंवेदसमूहस्यस्वार्थेश्वरप्रतिपादनद्वारैवेश्वरमुपासीतेतिविधौतात्पर्यंतदेकवा
क्यतयाप्रामाण्यंतन्मतेप्यावश्यकं। अन्यथास्वर्गनरकादिबोधकस्यापिस्वार्थप्रामाण्यंनस्यादितिभावः। वेदत्वं राम

स्यलौकिकवाक्यभिन्नवाक्यत्वं विजातीयधर्मजनकाध्ययनप्रतियोगित्वं। ग्राह्यग्राह्योपजीवि प्रमाणातिरिक्तप्र
माणजन्यप्रमित्यविषयार्थकत्वेसतिग्राह्यजन्यवाक्यार्थज्ञानजन्यप्रमाणग्राह्यत्वंवा। अत्रस्वर्गादिसाधनत्व
विशिष्टयागादिरूपस्यस्वर्गकामोयजेतेत्यादिवेदार्थस्यस्वघटकीभूतालौकिकस्वर्गादेः ग्राह्यग्राह्योपजीवि प्र
माणाभ्यामतिरिक्तेनप्रत्यक्षादिप्रमाणेनात्रग्रहणान्नवेदेनिरुक्तप्रमाणजन्यप्रमितिविषयार्थकत्वमितिन
लंघटोस्तीत्यादिलौकिकवाक्यस्येवतदन्यत्वंग्राह्यजन्यवाक्यार्थज्ञानजन्यभारतस्मृत्यादिवाक्यान्यत्वं। प्रमाणग्राह्य
त्वंचवेदस्यास्तीतिलक्षणसमन्वयः। घटोस्तीत्यादिलौकिकवाक्येतिव्याप्तिवारणायसत्यंतंवेदात्मकग्राह्यप्रमाणेन
साध्यादिसिद्धिनिर्वाहकग्राह्योपजीविनायागःस्वर्गसाधनंस्वर्गसाधनत्वावच्छेदकरूपवत्वादित्यनुमानादिप्र
माणेनचवेदार्थस्यग्रहणादसंभवइतिग्राह्यग्राह्योपजीविप्रमाणातिरिक्तत्वंप्रमाणविशेषणं। घटोस्तीत्या
दिवाक्यार्थस्यापिग्राह्येनतदुपजीविनाऽनुमानेनवग्रहणातिप्रसंगतादवस्थ्यमितिभेदघटनं। नचच
क्षुरादेरदृष्टद्वारागाह्योपजीवित्वेनतद्वाक्यार्थकलौकिकवाक्येतिव्याप्तिरस्त्येवेतिवाच्यं। ग्राह्यसंकल्पेनये

नप्रमितिर्जन्यते। तत्रश्रुतौपज्ञीविप्रमाणपदेनविवक्षणात् एकएवेतादृशंश्रेयोलाभायेनप्रथमप्रमापरम
पिसार्थकंद्वितीयप्रमाणपदंचासंभववारणायवेदसमानार्थकस्मृतिभारतादिवाक्येऽतिव्याप्तिवारणाय
श्राद्धजन्येत्यादिदृलंजन्यवाक्यार्थज्ञानाजन्यत्वनिवेश्योमीमांसकनैयायिकोभवसाधारणवेदत्वस्यनिवेश्य
यतयामीमांसकनयेज्ञानेजन्यत्वस्याव्यावर्तकतयाजन्यवाक्यार्थज्ञानजन्यत्वस्याभावप्रतियोगितानवच्छे
दकत्वेनतदवच्छिन्नभेदरूपतादृशवाक्यार्थज्ञानाजन्यत्वस्याप्रसिद्धि रितिज्ञानेश्राद्धजन्यविशेषणं॥अ
त्रश्राद्धजन्यत्वंश्राद्धप्रयोज्यत्वंअन्यथाश्राद्धप्रयोज्यस्मृत्यादि रूपवाक्यार्थज्ञानजन्यस्मृत्यादावतिंताद्दव
स्यात्। ह्रदोवह्निमानित्यादिवाक्यवारणायतृतीयंप्रमाणपदंमनसोवारणायवरमश्राद्धेतोपादानमित्यास्तां
विस्तरः।वाक्यात्वेवैदिकप्रशंसानिंदावाक्यानिप्रशंसानिंदाज्ञानपूर्वकाणिप्रशंसानिंदावाक्यत्वात्परिण
तिसरसमाम्रफलंनपनसफलमित्यादिवाक्यवदितिसंक्षेपः॥९६॥ ॥मूल॥स्यान्मयेसंभविष्यामीत्यादिसं
ख्याचवक्तृगा॥समाख्यापिनश्राखानामाघप्रवचनादृते॥९७॥ ॥टीका॥संख्याविशेषादितिध्यावक्ष्यामि

त्यादि। वेदतदैसतवद्ध[illegible]स्यामित्याद्युत्तमपुरुषाभिधेयाख्यास्वतंत्रवक्तृस्वतंत्रोच्चारयिताचेश्वरएवेति।
ईश्वरसिद्धिरितिकारिकापूर्वार्द्धार्थः। समाख्यापदार्थमन्यमाहसमाप्येति। नाध्ययननिबंधनाःकाख्ये
टकादिसंज्ञाआख्यातृणामानंत्यात्। किंतुस्वर्गादौकटादिशरीरग्रहणेश्वरेणप्रोक्ता[illegible]ग्रा
ख्यासाकाटकादिसंज्ञयाव्यवह्रियतइत्यवश्यंवाच्यंतेकाटकासंज्ञान्यथानुपपत्येश्वरसिद्धिरि त्याच
निभावः॥ इत्थंचसंख्याविरोधादित्यत्रसंख्यायतेकथ्यते[illegible]इत्यादिव्युत्पत्त्यासंख्याशब्दकाटका
दिसंज्ञादिपरइत्यास्तांविस्तरः॥९७॥ ॥मूलं॥इत्येवंश्रुतिनीतिसंस्मवजलैर्योभिराक्षा[illegible]लितेये
षानास्यद्मधासिहृद्येतेश्रोलसाराशयाः॥किंतुप्रस्तुतविप्रतीयविधयोप्युच्चैर्भवद्भितकाःकालेका
रुणिकलंयवकृपयातेतारणीयानराः॥९८॥ ॥टीका॥एवमीश्वरमननंविधाययेषामीश्वरेनविश्वास
स्तान्प्रत्याह॥ इत्येवमिति। इत्येवमितिइतिशब्दः। स्वस्वरूपार्थः॥एवंशब्दःप्रकारार्थःनीतिन्यायःश्रोलःपा
षाणं। सारोलोहतद्वद्यशब्देयेषांतेतथायुक्तिप्रतिसंधानाश्रयरूढ्याइत्यर्थः। प्रस्तुतेईश्वरेविप्रतीय

विधयः।प्रतिकूल-प्रकारात्नादृशाअप्युच्चैःकथंचित्कालेकदाचिच्चित्तकातरणायाः।यांकाकलंकशून्याःकर्न
व्याइत्यर्थः॥१८॥ ॥मूलं॥इत्याकर्ण्यनिसर्गसुंदरचिराच्चेतोनिमग्नंत्वयीत्यज्ञानंदनिधेतथापितरलंना
द्यापिसंतप्यति॥तन्नाथत्वरितंविधेहिकरुणायेनत्वदेकात्मनांयातेचेतसिनाघ्रुयामशतशोयाभ्याःपुनर्यो
तनाः॥१९॥ ॥इतिकुरुक्कमांजलिसमाप्ता॥ ॥टीका॥अस्माकंतुशंकानास्तीत्याह इत्याकर्ण्येतिनिसर्गे
सुंदरेतिसंबोधनं॥चिरान्नचिरकालंव्याप्यत्वयिनिमग्नंअद्धासत्यंयद्यपितथापितरलंमनोनाद्यापि
संतप्यति।तत्तिःफलेच्छाविच्छेदःतथाचफलेच्छाभाववान्नभवतीत्यर्थः।त्वदेकतांत्वन्मात्रप्रवणतां।याते
प्राप्तेआघ्रुयादितिक्रियापदम्॥याभ्यांयमदेवनाकयातनाःनरकपीडाः॥१९॥ ॥इतिश्रीमत्परमहंसप
रिव्राजकाचार्यवर्यश्रीनारायणतीर्थकृताकुरुक्कमांजलिकारिकाव्याख्यासमाप्ता॥ ॥शुभमस्तु॥ ॥
संवत्नु॥१८४०॥आनंदीनामसंवत्सरेवैशाखेमासेकृष्णपक्षेतृतीयायांरविवासरेनद्दिनंलिखितंशुभं॥

॥ ॥ स्तवकुसुमांजलिः समाप्तः ॥ ॥